कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

दाखल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M-2590	देवयाज्ञिक भाष्य		वेदांग	पूर्ण		3/9	66	संस्कृत	कागद	12	47		

M-2590

देवयाज्ञिक भाष्य

IV

4

श्री॥ ॐ नमो गणेशाय॥ ॥श्रुतिक्रमानुसारिणाचार्येण प्रथमं पौर्णमासमनुविहितं। अधुनादर्शस्यानुविधानं करि-
ष्यंस्तत्प्राक्कालीनं पिंडपितृयज्ञमनुविदधाति॥ ॥अपराह्णे पिंडपितृयज्ञश्चंद्रादर्शनेऽमावास्यायामिति। अ-
ह्नो दिवसस्य समं द्वेधा विभक्तस्यापराद्धितीयो भागोपराह्णः॥ शावस्तामथ्यात्। समं त्रेधा विभक्तस्याह्नः तृती-
यो भागो पराह्ण इत्यपरे। तत्कुतः। सवाऽपराह्ण इत्यातीति मुहूत्स पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामप-
राह्णः पितॄणामित्यर्थवादे पूर्वाह्णमध्याह्नापराह्णानां त्रयाणां दिवसभागानामभिधानात्। अह्नः पूर्वो भागः
पूर्वाह्णः। दिनस्य मध्यं मध्यंदिनः। अह्नोऽपरो भागः। अपराह्ण इति। पूर्वापराधरोत्तरमेकदेशिनैकाधिक-
रणे इति समासः। राजाहःसखिभ्यष्टजिति अह्नन्शाह्वांताट्च्। अह्नोऽह्न एतेभ्य इत्यह्नादेशः॥ अह्नोऽदंता-
दिति णत्वं। पिंडपितृयज्ञ इति वक्ष्यमाणस्य कर्मणः संज्ञा। सा च पिंडदानस्य वीर्यानुगमात्। पिंडैः पितॄणां
यज्ञः पिंडपितृयज्ञ इति। अत्र [illegible] होमजपादयस्तदंगं। प्रयोजनं चिंतायाः। पिंडदानस्याकरणेऽभ्यावृत्तिर्ने
होमादेः। अमावास्यायामपराह्णे चंद्रादर्शने पिंडपितृयज्ञो भवतीत्यन्वयः। तत्रामावास्यायामपराह्णे [illegible] पिंड-
पितृ— इत्येतावत्के अमावास्याशब्दे स— वास्यायाममावास्यया यजेत। य एवं विद्वानमावास्यां यजत इत्या-
दौ कर्मण्यपि दर्शनात्कर्मसंबंधेनैव पिंडपितृयज्ञो विहितः स्यात्। कर्मण एव प्रस्तुतत्वान्नामावास्या एम

तिथिलक्षणा कालसंबंधेन । भवत्वेवं को दोष इति चेत ॥ मैवं । तथा सति दाहाय पराजयसंपर्कोडुपाप्यिनाम
पनेमारस्वतसत्राहोपक्रमध्ये आमावास्येपिंडपितृयज्ञप्राप्तेः । अनतस्तद्व्याहतसमर्थं चंद्रादर्शन इति विशेष
णं । चंद्रमसादर्शनं च द्वादर्शनं । तच्चामावास्यादिनाद्वीपांतरवर्तित्वाद्दिनापि भवति । तेन तच्चंद्रादर्शनममावास्या
पदेन विशेषयति । चंद्रादर्शनशब्देनात्र चंद्रमसः परमः ह्रासोपलक्ष्यते न त्वयमोत्रं । तस्य प्रतिदिनं संभवा
त् । कुत एतदवसितमिति चेत् । तस्मिन्सीतोदरातीसुपक्रमपरे वैषन्नपुरस्तान्नपश्चाद्ददृशे एष्ये भो
दस्तीति श्रुतेः । अतो मावास्यायां तिथौ अपराह्णे चंद्रमसः परमह्रासविशिष्टे एव काले पिंडपितृयज्ञोन्वव
तीति सूत्रार्थः । तेनवासापराह्णोपक्रमध्ये आमावास्यानुष्ठाने पिंडपितृयज्ञस्यानिमित्तभूतकालाभावा
दननुष्ठानं सिद्धं । कालकर्त्तोपविधिमुपरि ज्ञाति ॥ ॥ दक्षिणाग्नेरपरां । अत्र पितृयज्ञे दक्षिणाग्नेश्चरुः
अपरां भवति । गार्हपत्याहवनीयापवादोयं । शाखान्तरात् ॥ ॥ होमश्चाद्दक्षिणाग्नाविस्यनुवर्त्ततेनामे होमो न
जुहोत्यग्नय इति सोमायेति चेति वसमानो होमोपि दक्षिणाग्नावेव भवति । आहवनीये होमार्तत्साप्यपवादः ॥
॥ परिस्तीर्य तत्रैव वसाद्यात्रासारनममेकया ॥ तदक्षिणाग्निं हूत्तैः परिस्तीर्य पूर्ववा । मोर्स्य माहवमाच्छाणाबासा
दनं भवति । पूर्ववेदिमनेन अपणसंपश्चादुत्तरतो वा अर्धं बद्धे सेनावदति । हिरुपते । द्विशादेसेन दप्याप्नोति त

न्निगृत्सर्थमेकशर इति। स्फ्यकृशाः एकैकं पात्रमासादयति। न द्वंद्वं। न प्रोक्षप्रयोगः क्रमेणासा दक्षिणाग्नेरुत्तरतो दक्षिणाग्रं तत्स्थः। स्फ्यः
। शूर्पं। अग्निहोत्रहवणी वा। चरुस्थाली वा। कृष्णाजिनं। शम्या तया त। उलूखलं। मुसलं। व्रीहयः। स्रुक्। चविग्रहणपद्दे
अन्नचरुस्थाली। चरुश्रपणार्थमुदकं। आज्यं। पात्रे स्तरणं। समित्त्रयं। उदपात्रं। समूह्य दक्षिणानि दर्भतृणानि। सन्ना
हीनाम्नन्तमरिति। ननु परिस्तरणस्याहुतिमात्राङ्गत्वादत्रापि तत्प्राप्नोत्येव किमर्थं पुनरुच्यते परिस्तीर्येति।
सत्यं। तन्नु होमात्पूर्वकाले प्राप्नोति न त्रिकाल इति तेन कालविशेषविधानार्थं पुनर्वचनं। येषां तु नाङ्गत्वं
तेषामप्राप्तस्य विधानार्थं। एतच्च परिस्तरणं होमांगत्वाद्धोमस्य यज्ञोपवीति — कारणपक्षे इदमपि यज्ञोपवीति
नैव प्रागुदग्भिर्दर्भैः प्रागुदक्संस्थं प्राङ्मुखेन कार्यं। प्राचीनावीतिना होमकरणपक्षे परिस्तरणमपि
तथैव कार्यं। अत्र सर्वकर्मोपसव्येन दक्षिणामुखेन च कर्तव्यं। अग्रेनीविशिष्टं सनविधानात्पूर्वमप्येवनी
वीबंधनं कार्यं। ततः परिस्तरणादि। आपस्तंबः। दक्षिणाप्रागग्रैर्दर्भैर्दक्षिणाग्निं परिस्तीर्य दक्षिणतः
पश्चाद्दर्भान्संस्तीर्य दक्षिणाप्राच्येकैकशः पितृपित्र्यपात्राणि प्रयुनक्ति। स्फ्यं मेक्षणं कृष्णाजिनमुलूख
लं मुसलं शूर्पं मांसस्थालीं चरुस्थालीं येन वा मेनार्थो भवतीति। आश्वलायनोपि। दक्षिणाग्नेः प्रागुदक्। प्रस
गुदग्वैकैकशः पात्राणि सादयेच्चरुस्थालीशूर्पस्फ्योलूखलमुसलकृष्णाजिनसहदाच्छिन्नेध्ममेक्षणाक

मंडलमिति ॥ ॥ अपरिणामार्हे पसं चरुमपूर्णमस्कंवा तूष्णीं गृहीत्वोत्तरेणा दक्षिणाग्निमवहंति तिष्ठन् प्रागाहृय
साद्य परस्यां दिशि अथ शूर्पं च हं चरुस्थालीं तूष्णीं व्रीहीन्स्रुवेण मुष्टिनां प्राचीनावीती दक्षिणामुखो ध्रुवे गृह्णी
यात् । अथवा अग्रपूर्णां स्रुचं गृहीत्वा पात्रमात्र । अतश्च विकल्पः । चरुस्थाल्यां ग्रहणं सकृत्त्रिर्वा । मंत्रस्याविधानात्तूष्णीं
ग्रहणं लौकिकवाग्गृह्याराणामतिषेधार्थं ॥ आपस्तंबसूत्रे विकल्पः । दक्षिणतः प्राङ्पं व्रीहिमुष्टिकं सव
स्थितं भवत्स्वधपुरूपवीती स्थालीमेकपवित्रेणांतर्द्धापतया दक्षिणतः शकटादधि निर्वपति उत्तरतो वा
प्राचीनावीती तौ पूर्वविल्वानि माहिमन्मयेनिर्वपति । पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति । अतश्च स्था
ल्येव ग्रहणं ॥ मानवे ॥ उदकामेकपवित्रमवधाय पूरपिचाबिलं निमार्ष्टीति ॥ शांखायनः ॥ गार्हपत्यस्य प
श्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं निधायोपरिष्टाद्व्रीहीन्माशांउत्ताछूर्पे स्थालीं आस्य सव्येनानुलोमामुष्टि
ना व्रीहीन्गृह्णाति पितृभ्यस्त्वा पमप्या ध्येबिलाच्छतः स्पस्यादिति । आश्वलायनः । दक्षिणतोग्निष्टमाहस्य
चरुस्थालीं पूर्णां निमृज्जेदिति । तत एवं गृहीत्वा दक्षिणाग्नेरुत्तरतो गार्हपत्यस्य पुरस्ताद्दक्षिणामुखवत्ति
ष्ठन्नवहंति । अत्र शाखांतरात् दक्षिणाग्नेरुत्तरत उदग्ग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय तस्मि
न्व्रीहीणाम वत्तेय कृत्वा मुसलमादाय दक्षिणामुखवत्तिष्ठन्नवहमनेकंडनं व्रीहीणां केति ततः शूर्प

मासप्रोक्षणलाजहीनैः कार्यं निष्पवनेन तु यो निधाय शाययेत॥ आपस्तंबः॥ अपरेणाग्न्यन्वाहार्यपचनं प्रसगुदग्ग्रीवे
२ कृष्णाजिन उलूखले प्रतिष्ठिते दक्षिणाशची तिष्ठंती प्रसव्यं हंति पराप्रावमविवेकं सकृत्फलीकरोति दक्षिणाग्नौ
जीवतंडुलं श्रपयतीति। आश्वलायनः। कृष्णाजिनउलूखलं कृत्वेतरां पत्न्याहृत्य मादविविच्य मवहता सकृत्फलना
न्दक्षिणाग्नौ श्रपयेदिति॥ ॥सकृत्फलीकरोति। तत्तः सकृदेवफलीकरणं करोति। लोके तस्य पुनः पुनः कि
यमाणत्वात्सकृदित्युक्तं। सजघने न गार्हपत्यमिति प्रकृत्य सर्वस्य श्रुतत्वात्॥ ॥तास्तंडुलमहं संश्रपयि
त्वाभिघार्योद्वास्यमेक्षणेन जुहोत्यग्नय इति सोमायपेति च। इमं चरुं सारतंडुलं ईषत्क्लिन्नतंडुलं। तथा श्रपणं
।यथाश्च तेन चरुणा स्थाल्याः पूरणं न भवेत्तिथा कर्तव्यं। एवंविधं चरुं श्रपयित्वाश्रामाहितेनाज्येनाभिघा
र्य दक्षिणात उद्वास्य दक्षिणाग्नेः पूर्वमाग्नेयां प्रदक्षिणमुत्तरं आनीय प्रसव्यं कृत्वा तिष्ठन्ति स्वः समिध आश्रा
धस्यपोपविश्य प्राग्मुखो मेक्षणेन चरुं जुहोति दक्षिणाग्नौ। अग्नये कव्यवाहनायेति सोमाय पितृमत इति द्वाभ्यां
मंत्राभ्यां प्रतिमंत्रं द्वे आहुती॥ ब्रह्मपुराणे। ततो हुत्वा तु मन्त्रं तु सोमस्याद्यमसाधितं। तानग्नौकरिष्य इति प्र
तिमार्थयेद्द्विजान्। कुरुष्वेति तैरुक्तो दक्षिणाग्निं समाश्रयेत्। दक्षिणाग्नौश्चतुर्दिक्षु दर्भानास्तीर्यं वाग्यतः। राम
दद्याद्वा समिधस्तिस्रस्त्विस्मात्प्रादेशमात्रिकाः। पालाशाः समिदर्द्धे वनियोज्याः पितृकर्मणि। घृताक्ता समिधो २

ऊलाद्दक्षिणाग्राः समंत्रकाः। मेक्षणेन घृताक्तेन जुहुयादुनित्रपाणिनिति। अत्राग्नौकरणे समिद्धः स न दर्शनात्सिं
दु पित्र्यज्ञेपि समिद्धाधानं समूलं। अन्नमत्रियार्थं दक्षिणात उद्वासपनीतिमानवे॥ काठकेच॥ यज्ञोपवीती प्राङ्-
मुखीनो मेक्षणेन जुहोतीति शांखायनः। अथ पुंहपवीती दक्षिणांजानाच्यमेक्षणा उपस्तीर्य तेनावद्यापाक्लिघार्येत्सा
पस्तंबः॥ कात्यायनः॥ आग्नौकरणहोमश्च कर्तव्यउपवीतिना। प्राङ्मुखेनैव देवेभ्यो जुहो — ति श्रुतिश्रुतेरिति।
अत्र केचिदपसव्येन होमं कुर्वंति तेषां मतउद्धास्या ह्मग्नौ द्व आहुती जुहोति। देवेभ्य इति स्वश्रुतिविरोधः। अत-
स्तच्छाखानतीयं विधानं। तथा च कात्यायनः॥ अपसव्येन वा कार्यो दक्षिणाग्निमुखेनचेति। मेक्षणं वहोमसाध-
नत्वाद्धैकंकृतं। पालाशमपि भवति। तथा च कात्यायनः। इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्। वृत्तं वा-
गुष्टपर्व्वग्रमवदानक्रियाक्षममिति॥ अत्र हरिस्वामिनः॥ एते आहुती पिंडदानांगमते। ततश्च विस्मृतयोर्न
श्चहरुमायः किं तर्हि प्रायश्चित्तं हुत्वा आज्ञोसमाप्येरन्नेन होतव्यमिति॥ ॥प्राप्त तदक्षिणेनोल्लिखसप-
हृतादूसपरेणवा। तत्रेक्षणं दक्षिणाग्नौ प्रास्य प्रस्तुतत्वात्तदक्षिणाग्निं दक्षिणेन तस्माद्दक्षिणा संगृहीश्चि। अथ
वांतं दक्षिणाग्निमपरेण तस्माद्दरस्मादक्षिवास्येनोल्लिखति दक्षिणाग्निस्थाने रेखां करोत्यपहता इति
मंत्रेण। सव्येन होमयज्ञे मेक्षणाशनमपि सव्येनेव। तदंगलात्। तदंगलंचाग्नौ मेक्षणमभ्यादधातीति। तस्मिं

४ इद्धूष्माजननमिति श्रुतेः ॥ अपसव्येन होमप्रदेशं पश्चिमेनैव मेक्षणप्रासनमिति ॥ स्फ्येनेति रणखंतातत । तथा चापस्तं
बः । स्तद्भूरस्यो मेति विलिख्येति ॥ ॥ आश्वलायनोऽपि । स्फ्येन लेखामुल्लिखेदपहता इति ॥ ॥ उल्मुकं परस्तात्करोतीति येरू
पाणीति । रेखायाः परस्ताद्रेखापारदक्षिणप्रदेशे ये रूपाणीति मंत्रेणोल्मुकं दक्षिणाग्नेरेकदेशं निदधातीति । स्था
पयति ॥ ॥ उदपात्रेणावनेजयत्यपसव्येनैवोदकं दक्षिणासामर्थ्यो रेखायामवनेनिक्ष्वेति यजमानस्य पितृप्रभृ
तित्रीन् । उदकस्य पात्रमुदपात्रं पूर्णपात्रादि । तेनोदपात्रेणाद्भिर्यजमानस्य पितृप्रभृतिपितुरणमत्री
मुरुषामित्व पितामहममुष्य पितामहानपसव्यं यथा स्यादुत्तमस्य सव्यप्रदेशाद्दक्षिणाप्रदेशेनोदकनिनयनं यथा स्या
त्तथांगुष्ठप्रादेशिन्योरंतरालेनावनेजयति अवनिक्तान् शुचीन्करोतीति पिंडदानाय । तद्यथाह्निष्पते लिखिवेदेवं तदि
ति श्रुतेः । अमावितिसंबुद्ध्यंतगोत्रनामादेशपूर्वकं अमुकसगोत्र यजमानपितरमुकशर्मन्नत्रावनेनिक्ष्वेत्यनेन
मंत्रेण । एवं पितामहामुकशर्मन्नत्र पितामहामुकशर्मंत्रिति । रेखायाम् मूलमध्याग्रप्रदेशेषु दक्षिणासंस्थमवने
जनं कार्यं । अपसव्यमवनेजनं कस्मात् । सव्येनोदकदानसामर्थ्यात् ॥ अनेनत्त्राचपवेनोद्धरंति मनुष्येभ्य इति
श्रुतिः प्रकरीक्रियते । अस्यां हि श्रुतावभिनयेन पितॄणामंगुष्ठप्रादेशिन्योरंतरालेन दानं प्रतीयते । तथाहि त
दा इति दत्तानीतीव वै देवेभ्यो जुहूस्रुद्धरंति मनुष्येभ्यो ध्येवं पितॄणामिति । अग्रेणारे वानाहोमः कनिष्ठिकाप्रदेशे एम
४

नमनुष्यामुद्धरणोपरिवेषणादपर्यायं। अथैवमितं गुरु[illegible]आदिहिंसोरन्तरालमेव पितृणां परिश्रियते। अत इदमा
हायमस्त्वमिति। यजमानपितृप्रभृतीति सूत्रणात् अथ सावेतत्त इत्येव यजमानस्य पित्र इति श्रुतेः स्वपिंडपितृमात्रे ध्व
र्युरेव कुर्वन्तीति प्रतीयते॥ ॥उपमूलसकृदाछिन्नानि लेखायां कृत्वा मयथावनिक्तं पिंडान् ददास्यसावेतत्त इति। अवनेज
नानंतरं उपमूलं मूलसमीपे सकृदाछिन्नानि एकेनैव प्रयत्नेन छिन्नानि दर्भतृणानि दक्षिणाग्राणि रेखायां कृत्वा
आसीनेय यथावनिक्तं यत्र यत्रावनेजनं यस्य यस्य कृतं तेन तत्र तत्र पितृपितामहप्रयोगः॥ त्रेधाहापस्तंबः ॥समूलं स
कृदाछिन्नं बर्हिराहरति सकृदाछिन्नानि वा तृणानुपमूलं दितानीति। बर्हिः कुशाः तृणानि काशादीनीति हेमा
द्रिः॥ अत्र विशेषमाह देवलः॥ तस्मिन्स्थाने तु नो दर्भान्नैकमूलाञ्छिवान्बहून्। दक्षिणाग्रानुदक्कार्हान्संवीतांस्त
स्तृणुयात्समं इति। तस्मिन्निति पिंडदानस्थाने। एकमूलान् एकमूलतस्तंबजान् बहुशिखान् शिवान् निति साग्रान् अ
कुण्ठिताग्रत्वादिविशिष्टान्। बहुवचनात् त्रीनेवेति नियमो माभूदिति बहून्। भूम्याच्छादनपर्याप्तान्। संख्याति
यमस्तृणाति अस्तरणास्पदृष्टार्थत्वात्। समं। सममच्छिन्नतया। समेतरपातसममूलतया वेति। एकमूलत्वावि
धमत्रादेवतैषां समूलत्वमपि गम्यते। अत एवोपमूलं मूलसमीप एव छेदनमुक्तं॥ ॥पेचत्वा मलिति चैके।
एक एतत्ते पेचत्वा मनु इत्येवं पिंडदानमंत्रेशेषं कुर्वंति। मानवे पिंडान्निदधाति पितृन्नामावेतत्ते पेचत्वा

५ मनुतस्मैतेस्वधेतिप्रथमं।पितामहस्यनाम्नाऽऽच्छवीयांस्तेमध्यमं।प्रपितामहस्यनाम्नाऽऽच्छविष्टंह्नितांदमोरपर्युक्तोनाम
नीग.हृ.।मलदेशेलेपं निमार्ष्टिलुप्यतेजीवत्पितुःपिंडनिधनंवाजीवत्पितामहस्यप्रयानजीवंतमतिदद्याद्यदिह
याचेम्एवपितारद्यान्नेभ्योदद्याद्यदिबंधुनामनविद्यात्स्वधापितृभ्यःपृथिविषद्भ्यइतिप्रथमंपिंडंदद्यात्स्वधापि
तृभ्योंतरिक्षसद्भ्यइतिद्वितीयंस्वधापितृभ्योबर्हिषद्भ्यइतितृतीयंइतिएवमेवापस्तंबसूत्रेपि।परिक्षिपितृकःसा
देकैकं।कि।पिंडेद्वौद्वाबुलसपेरितिविशेषः।।शौनकः ।।नामामविद्वामितःपितामहप्रपितामहेति।व्याघ्रपा
त।गोत्रातानेनुकाश्यपइति।ततश्चकाश्यपसगोत्रत्रपितःपृथिविषत्त्वावनेनिक्ष्व।पितामहांतरिक्षसज
प्रपितामहदिविषदितिप्रयोज्यं।। ।।अत्रपितरइत्युक्त्वोदङास्तआतमनात।अत्रपितरइतीमंमंत्रेपिंडंसंमु
खएवोक्तोसंहितास्वरेणपठित्वाऽमरद्विशांपर्यावृत्योदङ्मुखोभूत्वाश्वासधारणांकृत्वोपविशेत।आतमनात।
तमुग्लानौ।तमेनग्लानिः।तयोरमुख्याबद्धानमात्रेणाश्वाशा नितोधंकृत्वेत्यर्थः।तदाहविष्णुः।पथ्याशक्तिमाता।
निरोधंकृत्वासीतेति।शक्तिमनतिक्रम्यपथ्याशक्ति।जपश्चापं।तत्रतेपस्मत्रपितरोमादयध्वमिति।श्रुतत्वात।
ततश्चसंहितास्वरेणप्रयोज्यः।। ।।आहस्मामीमदंतेतिजपति।आवृत्यपरछित्वाप्रत्स्थायपिंडसंमुखोभूत्वामी
मदंतेतिमंत्रंजपतिसंहितास्वरेण।। ।।अवनेज्यपूर्ववन्नीविंपिविस्यनमोवइत्यंजलिंकरोति।पूर्ववदवनेज्य राम
५

उदपात्रेण वनेजयतीत्यादिप्रकारेण वनेजनं कृत्वा नीविं विस्रस्य नमो व इत्यादिभिः षड्भिर्मंत्रैः षडंजलीन् कुर्या
त् । षट् कृत्वो नमस्करोतीति श्रवणात् । पघपांजलिमिति सूत्रे एकवचनेन तथापि समानार्थां श्रुतौ महापितृयज्ञे षट्कृ
त्व नमस्कारानिति सूत्रकारेणोक्तत्वात्तथैवानुष्ठानं युक्तम् ॥ अत्र नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो व इ
त्येतावा षष्ठो मंत्रः । एवं षट्चतुर्थ्यंताः प्रतिष्ठा एव । गृहाणां पत्नीनां वा वेक्षणं कुर्वता गृहान्नः पितर इति । नपश्चम
हापितृयज्ञवदत्रापि कार्यं समानश्रवणात् ॥ ॥ एतद्व इत्युपमास्यतीति सूत्रात् । प्रतिपिंडं एतद्वः पितर इत्यने
न मंत्रेण प्रतिपिंडं बहुवचनात् त्रीणि सूत्राण्युपास्यतीति पिंडानामुपरि निदध्यातीत्यर्थः ॥ ॥ ऊर्णा दशा वा । ऊर्णा
मेषरोमाणि तन्निर्मितवस्त्रदशा वा बहुत्वविशिष्टाः प्रतिपिंडं एतद्व इति प्रास्यति । अथवा ऊर्णां वा दशां वेति प
क्षद्वयं तथा च मानवे ॥ वासस्तम ऊर्णां दद्यां दशां वेति । आपस्तंबसूत्रेपि ॥ वाससोर्दशां छित्वा निदध्यादूर्णास्तुकां
वा पूर्वे वयस्युत्तरस्मा आयुषि स्वलोम वेति ॥ ॥ वयस्युत्तरे यजमानलोमानि वा । उत्तरे वयसि यजमानस्य पंचाशत्तम
वर्षादूर्ध्वं यजमानलोमानि वा पलितानि दूदयष्ठौ । निरुक्तस्थाने प्रतिपिंडं प्रास्यति । उत्तरराद्योपासनात्पूर्वोत्तर
भागेनाशीतवर्षरूपस्य वयसो द्विधा विभागः । तथा च पराशरः । पंचाशद्वार्षिकोपकुर्याद्धोमस्व मंगुकृति
ति । आद्याय निः । पंचाशतऊर्ध्वं मुतेल्लोम यजमानस्येति ॥ ॥ ऊर्जं मित्यपो निषिंचति । पितृणामधिष्ठाने पिंडाः । ते

६

नऊर्जंवहंतीरित्यनेनमंत्रेणोदपात्रेणावनेजनावशिष्टमुदकंपिंडानामुपरिनिषिंचतिपिंडसमीपेभूमौवा।उभयप
क्षाशाखांतरेस्यात्।स्वधस्थतर्पयतमेपितॄनितिमंत्रलिंगात्॥।।अवघ्राणमवजिघ्रतियजमानः।पिंडानधृषुः
स्थाल्यांप्रत्यवदधाति।एषास्थाल्यांपिंडान्समवधायेत्यापस्तंबः॥ततोयजमानःसव्यंकृत्वापिंडान्स्थालीस्थाने
वाऽजिघ्रति।अवघ्राणेयजमानस्याधिकारः।यजमानभागइत्यर्थवादात्।ततश्चप्रोषितेयजमानेनभव
ति।अत्रचल्यवादेशःएवेकालनतामात्रे।नयमानकर्तृकत्वापो॥निरूप्याग्नेमातद्दहनमितिवत्॥।।उल्मुक
सकृदाछिन्नान्यग्नौ।पूर्वंसकृदाछिन्नानिपानिरेखायामास्तृतान्यभवन्तान्यग्नौदक्षिणाग्नौप्रक्षिप्यततउ
ल्मुकंतत्रैवप्रतिप्रहिणोति।अग्नौसकृदाछिन्नान्याधारधातिपुनरुल्मुकमपिसृजतीतिश्रुतेः।सूत्रेचोल्मु
कंपदस्यप्रथमोच्चारणमस्माचरत्वात्तेनप्रथमंसकृदाछिन्नमासनं॥ततउल्मुकम्॥।।आधत्तेतिमध्यम
पिंडंपत्नीप्राश्नातिपुत्रकामा।पुत्रकामागर्भग्रहणयोग्यातुस्नातापत्नीमध्यमपिंडंपितामहस्यपिंडमा
धत्तपितरोगर्भमितिमंत्रेणप्राश्नाति।आपस्तंबः॥तंपत्नीप्राश्नातिपुमांसंहजानुकाभवतीतिविज्ञाय
ते॥पत्नीबहुत्वेपिंडविभागोमंत्रावृत्तिश्चेतिधूर्त्तस्वामी॥मानवे॥मध्यमपिंडंपत्नीप्राश्नीयादग्नावि
तरौवार्ध्याद्वातत्रोवाभक्षयेदप्सुवागमयेदिति॥परा।शरः॥पिंडानांमध्यमंपिंडंपितृन्ध्यायन्तंमाहि

राम
६

ता। प्राशयेत्सुत्रकां मातुर्भार्यां तं श्राद्धं स्वयं। सुषा वापि सगोत्रा वा पुत्रका मांद्विजाज्ञया। आधत्त पितरो गर्भमाहरेपुद्दिजातनयः॥ महालीगगृहीतावातश्चगोपत्रामापच। स्मंतु मे पितरो रोगनिसुक्ता प्राशयेद्व्रतं। श्रमानश्चुद्रुतो शीवाह्निपेऽङ्गवेद्धिजोपका। अजापवामद्द अद्यान्नयश्चाद्धि प्रविसर्जेनमिति॥ ॥प्रतेभ्योद्दाति। पलितप्रभृति भ्योद्दानसुकृतंत्र्येतेभ्योमतेभ्यः पितृपितामहप्रतितामहेभ्योद्दाति॥ अत्र चहरिस्वामिनः॥ के पुनस्ते पितरो येभ्य इदं दीयते। उच्यते। यजमानस्य पित्रे ददातीमादिवचनादेतत एवमितरस्तेभ्योपि जीवद्भ्य एव दानेप्राप्ते प्रतेभ्यो ददातीति वचनास्तकुतस्त्वेव परोक्षः पितर इत्यादिदर्शनेभ्यश्च प्रेतेभ्यो देयं। अथ पेएते देवा वसवः पितरोज्ञेपारुद्रास्तेपाः पितामहाः। प्रपितामहास्त्वादित्या इ साधाः। तथा पितरो वै तस्यासन्निति। तथा शरद्दमतः तीव्रिरस्ते पितर इति। तथाग्निष्वात्तारयः पितृगणाः। तेषां को पयोगः। उच्यते। एषामेव कुत्र्याधिदैविकाः पितरः। तेतसेपथाप्राप्तरोतृप्यंति पितरस्तृप्यंति। तथा तेष्व पितृप्यस्वाधिदैविकावस्थारूपस्तृप्यंति। महापितृयज्ञेनु तएव सोमवद्दादय इष्यंते। पिंडाश्च मेतेभ्य एव दीयंते॥ ॥जीवपितृकोपि। जीवपितृकोपि पिंडपितृयज्ञेनाधिक्रियते॥ ॥जीवंतं हि तेपि। यतो जीवपितृकस्य जीवेन पित्रादिना अंतरे पिग्यवहितेपि पितामहादौ पिंडदानं भवति। सोमादावपि वा येभ्य एव पिता ददाति तेभ्यो दद्यात्तथा श्रुत इति स्मृतेः॥ ॥जीवपितृकस्य होमांतमनारंभो वा।

तत्रजीवपितृकस्य यजमानस्य होमांतमेव पिंडपितृयज्ञसंतं कर्म भवति । अथवा अनारंभ एव पिंडपितृयज्ञस्य ।
वेत्याहुः सर्वेषत्तन्निरासार्थः । अत्रानारंभपक्ष एव युक्तः । यतः पिंडदानं प्रधानं । तदभावे होमांतस्यांगभूतस्या
नुष्ठानं न घटते । एवं जीवपितृकोपीति पक्षद्वयं दूषयित्वेदानीं जीवपितृकस्य होमांतमिति मत्रोपन्निषाह ॥ नूमते
तेजातूकर्ण्यो न जीवंतमतिदधातीति श्रुतेः । जीवपितृकस्य होमांतं कर्म कुतः । यतो जातूकर्ण्य आद्यायेप्यवे
तेजीवतापित्राव्यवहिते पितामहादौ पिंडदानं न भवतीत्याह कुतो न भवतीत्यत्र हेतुः न जीवंतमतिददातीति शा
स्त्रांतरे श्रवणात् । अतः प्रधाने पिंडदाने जीवपितृकस्य निषिद्धे अनारंभ एव घटते न होमांतता ॥ आपस्तंबः
॥ यदि जीवत्पिता न दद्यादाहोमात्कृत्वा विरमेदिति ॥ मानवे च ॥ यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादि
ति ॥ काठके ॥ पिता पुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात्पितापेतः स्यात्पितामहो जीवेत्त्रेपिं
डं निधाय पितामहात्परेभ्यो दद्यादिति । श्वोनोदते सदृष्टे वेति पक्षे चतुर्दश्यामप्युपवासो विहितः । तद्द
चतुर्दश्यामग्न्यन्वाधानादि कृत्वापरतरमावास्यायां दर्शेष्टिः क्रियते । ततोअपराह्णे पिंडपितृयज्ञः प्राप्तो ।
अपराह्णे पिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामिति तत्कालस्य प्राप्तत्वात् । अमावास्योपवासपक्षेत्वा अम
मावास्यायां पूर्वाह्णे दर्शार्थमग्नीन्विहृत्यान्वाधानं कृत्वा वैश्वदेवं च कृत्वा ततोपराह्णे पिंडपितृयज्ञः प्राप्त

र्शेष्टिः प्राप्नोति । एवं कदाचित्प्राक्कदाचित्पश्चादित्यनियमे प्राप्ते नियमार्थमाह ॥ ॥ पूर्वो वांगत्वात्पिंडपितृयज्ञः ।
पूर्वेद्युर्दर्शेष्टेः पिंडपितृयज्ञो न पश्चात् । कुतः । अंगत्वात् । अंगत्वं प्रतिपादकवाक्यात् । पूर्वेद्युः पितृभ्यो य
ज्ञं निःक्रीय प्रातर्देवेभ्यः प्रतनुत इति वाक्यात् । एतेन जीवत्पितृकस्यैव चतुर्दश्यामुपवासपक्षो न मृतपितृ
कस्य स्मार्त्ते भवति । तस्य हि पिंडपितृयज्ञोऽवश्यं दर्शात्प्रागेव कर्त्तव्यः । न च तो चतुर्दश्यामुपवासपक्षे प्राग
त्दर्शात्तस्य भवति । विहितकालाभावात् । अतो मृतपितृकस्यामावास्यायामेवोपवासो जीवत्पितृकस्य चतु
र्दश्याममावास्यायां वेति विकल्पः ॥ ॥ प्रकरणात्कालं लिंगानुग्रहवचनान्नाहिताग्निश्रुतिस्तोनंगं । पिंड
पितृयज्ञस्तरस्तनुवर्त्तते । पिंडपितृयज्ञो दर्शस्यानंगं । दर्शांगं न भवति । कुतः । प्रकरणभेदात् । यस्य प्रकर
णे पठ्यते तत्तदंगं भवति । न चायं दर्शप्रकरणे पठ्यते । अतो नांगं । किं च । कालभेदात् । अंगानां प्रधान
कालता साध्येति मापादंगानां प्रधानानामेककालता भवति । अत्र तु कालभेदो विद्यते । दर्शस्य प्रति
प्रधानकालता साध्येति मापादंगानां प्रधानानामेककालता भवतिः । अत्र तु कालभेदो विद्यते । दर्श
स्य प्रतिपत्सर्वो द्रष्टव्य । पिंडपितृयज्ञस्यामावास्यापराह्णे एवेति । अतो पितृदर्शांगं । तथा । लिंगोक्त्वा । पक्ष्मणा
गृहीतरपोऽर्स्मामासे न पत्नी न पितृयज्ञेनेवामावास्यामवरुंधे इत्यमावास्यविनापि केवलं पितृयज्ञं दर्शोप

ति। परिदर्शांगं स्यात्। तदा दर्शे प्रधानं विना केवलस्यांगमात्रस्यानुष्ठानदर्शनं न स्यात्। अस्ति च। अतो स्माल्लिंगादपि न द
८ र्शांगं। तथा। अनुग्रहवचनाच्च। अस्य पिंडपितृयज्ञस्यागवामयनादौ संवत्सरसत्रे दर्शात्पृथगनुग्रहवचनमस्ति। कथ
मेषां पितृयज्ञो नंतरितो भवतीति। दर्शांगं स्यात् तदा कथमेषां मामावास्यहविरनंतरितं भवतीति। दर्शन पुरोडाशे
न चैव समावास्यानुग्रहे पौवपितृयज्ञस्यापि ग्रामाजादिवदनुग्रहसिद्धेः पृथ-नुग्रहवचनेन स्यात्। अस्ति च पृथ
गनुग्रहवचनं अपास्तनैरिति ब्रूयादिति। अतोप्यनंगं। अपि चानाहिताग्निश्रुतेश्च। अनाहिताग्नेरपि पिंड
पितृयज्ञः श्रूयते। अथ नाहिताग्निना कार्य इति। यदि दर्शांगस्यात्तदा अनाहिताग्नेर्दर्शाभावान्न श्रूयेत। अस्य
ति च। अतोपि न दर्शांगमिति। एवं प्राप्ते आह॥ ॥ अंगं वा समभिव्याहारात्॥ अथवा दर्शांगमेव पिंडपितृयज्ञः। कु
तः। समभिव्याहारात्। समित्येकीभावे। अभीत्याकांक्षापातत्वश्च आकांक्षायोग्यतासंनिधिमतां पदानामु
च्चारणं समभिव्याहारो वाक्यं। तस्मादित्यर्थः। दर्शेष्टि पितृभ्यो यज्ञं निरुप्य पश्चात् दैवेभ्यः प्रतनुत इति। तेन यथा
प्रथमं शांतिकं कृत्वा ततः कृत्स्नसमारभेदित्यादौ ग्रहयागादेर्विवाहाद्यंगत्वं एवमत्रापि दर्शांगत्वं पितृयज्ञस्येति॥
यत्तु पूर्वपक्षे उक्तं प्रकरणभेदाद् दर्शानंगमिति। तत्रोच्यते। प्रकरणांतरपठितमप्यंगं भवति यथा प्रवर्ग्यः सौत्रा राम
मण्यामिवेति। यच्चोक्तं कालभेदादिति तत्रोच्यते। भिन्नकालेतिहितस्यापि वचनादंगं भवति। यथाग्निहोत्रं दर्शपूर्णमा ८

साह्वावुद्धरणादि। पश्माणाग गृहीतइमारिमदनं गत्वे लिंगमुक्तं तत्तुवाचनिकं दर्शाविनापिंडपितृयज्ञस्यकेवलस्यानु
ष्ठानं। नास्तिवचनस्यातिभारः। अतस्तदपिनानंगत्वेसाधकं। पक्षोक्तमनुग्रहवचनादितितदनुग्रहवचनमर्थवा
दरूपायमंगलेषुपपद्यतएव। अतस्तदपिनानंगत्वंज्ञाःपयितुमीहे। पक्षोक्तमनाहिताग्निश्चेति। तदपिस्मायवि
रुद्धंवावाचनिकंअनाहिताग्नेर्दर्शंविनापिंडपितृयज्ञस्यानुष्ठानविधानं। नहिवचनमापितंसापसहस्रेणापिप
राकर्तुंशक्यं। तस्मादंगोपिंडपितृयज्ञइति। जैमिनेस्त्वनंगमेव। तथाचाह। पिंडपितृयज्ञस्वकालात्वनंगस्यादि
तिपिंडपितृयज्ञउक्तः॥ इतिदानींदर्शेष्टिमाह॥ ॥१९॥ ॥श्वोनोदेतेसदृष्टेवापरांशाखांछिनत्तिग्रामींवेधे
सेतस्नेवेतिवा। श्वः आगामिनिदिवसे। नउदेता॥ नोदेष्यतिचेद्माइतिज्ञात्वाचतुर्दश्यांपर्णशाखांपर्णस्यप
लाशस्यशाखांइषेत्वेतिमंत्रेणऊर्जेत्वेतिअनेनवामंत्रेणएतौस्नाछिनत्ति। अथवाग्रामीलींग्रामीलींग्रामीम
मित्राशाखांछिनत्ति। नतुदर्शस्याकुतः। तद्धेकेदर्शोपवसतीतिवचनात्। अदृष्टेवा। अथवाअदृष्टेचंद्रमसिपश्चो
र्के। शाखांछिनत्ति। अमावास्यायामित्यर्थः। तत्कुतः। अमावास्यायाममावास्येनयजेतेतिवचनात्। तथाअस्त
मपाज्ञोतुस्तीर्णाज्ञीमादिनाचतुर्दश्यामुपवासपक्षेतेहेयमुक्त्वाहसमयंत्रेयएतारात्रिंनपुरस्तान्नपश्चाद्ददृश
इत्यादिनानावास्यायामुपक्रमविधानात्। शाखाअवयवःशामीलीशाखाप्रकृत्यादिशाखात्हृत्वाजितिडि

पातामाछिन्नक्षीपेत्वोर्जेत्वेत्युभयोश्छेदने विधानात्करणमंत्रत्वेन समुच्चयासंभवाद्विकल्प उक्तः ॥ ॥छिन्नक्षीति चोभ
योः साकांक्षत्वात । इषेत्वेत्यूर्जेत्वे सनयोरुभयोरपि मंत्रयोः प्रयोगे छिन्नक्षीति शेषो भवति । कस्मात । साकांक्षत्वात ।
क्रियापरप्रयोगसापेक्षत्वात । ननूभयोरविछिन्नक्षीत्यध्याहारः कुतः । तामाछिन्नक्षीपेत्वोर्जेत्वेति द्वयोरपि छेदने
विनियुक्तत्वात । ऊर्जेत्वेति मंत्रे वैकल्पिकमध्याहारान्तरमाह ॥ ॥सनमयामीति चोत्तरे ॥ अथ हे ऊर्जे त्वेत्यस्मिन्नु
त्तरे मंत्रे सनमयामीत्यध्याहारो भवति । न छिन्नक्षीति । कुतः । ऊर्जे त्वेत्यनुमार्ष्टीति शाखयानयात । अनुमार्जने
वत्सस्योदिपानेन नमयुक्तीकरणं । तत्र मंत्रलिंगादेव प्राप्तत्वादस्याचार्येणान सूचितं अतश्च माध्यंदिनीय
पाठश्च परशाख्यो मंत्रयोर्विकल्पश्छेदने विनियोगः । कुत एव शाखायापानश्रयणादुत्तरं तस्यानुमार्जने प
व विनियुज्यते ॥ तथा चापस्तंबः । ऊर्जेत्वेति सनमयत्यनुमार्ष्टि वेति । सनमनमयुक्करणं । मूलादारभ्या
ग्रात्स्पर्शनमनुमार्जनमिति धूर्तस्वामी । कोठके ॥ परिसमूलंये व्रतोपेतस्याध्वर्युः शाखांछिनत्ति । श
मीशाखां पलाशशाखां वा र्भपिंगुडूलानिवेषेत्वेति तयाश्चतस्त्राणां वत्सानपाकरोति इषेत्वोर्व इति धेनूः प्राचीः
प्रकालयतीति ॥ मानवे च ॥ प्रतीपेतस्य शाखामाछ्रतीति ॥ ॥बहुलपलाशामशुष्काग्रांप्राशुसीबीमन्मतमां
वा । कीदृशीं शाखांछिनत्ति । बहुलपलाशां बहुलपर्णां । पुनः कीदृशीं । अशुष्काग्रां । अशुष्कमाद्रमग्रम

स्याःस्मानथा।पुनःकीदृशीं प्रागुदीचीं।वृद्धादेशामां दिशि प्रसृतां।आसमंतमां वा प्राचीं वा दृष्ट्वा प्राच्यां दिशि
प्रसृतां।उदीचीं वा दृष्ट्वा उदीच्यां प्रसृतां या।प्राचीमाहरति उदीचीमाहरति प्रागुदीचीमाहरतीति तिरश्चा ख्यात
रात।। ॥व्रतमुपैति।शाखाच्छेदनानंतरमंतरेण पर्णश्रीगल्बापरेणाहवनीयं प्राङ्मुखस्तिष्ठन्निमीलितमात्तोपउपस्थ
स्थ व्रतमुपैत्यग्ने व्रतपतरद महमिति चेत्यनेन प्रकारेण व्रतमुपैति।ननु किमर्थमिदमुच्यते पौर्णमासवदमावस
यइत्यनेन प्राप्तत्वादिति चेत्।सत्यं।अहातातावसरस्य शाखाच्छेदनस्य कालस्तिथिधर्मापरमुक्तमित्यदोषः।ततं अव
तोपापवहीपाशनानंतरं शाखां छित्वा प्रगृणीकृत्य व व्रतोपायनं कर्त्तव्यं।शाखां छित्वा व्रतमुपैति।शाखांत
रीतास्य मावास्यायां व्रतग्रहणस्यायमेव काल नियम इति कस्यचि छे विछंका स्यात्तामपाकर्तुमाह।। ॥अथो
कंवा।शाखाच्छेदस्त्वस्मिन्नेवावसरे नियमेन भवति।व्रतग्रहणं तु पयोनं मासि मासि कालेवैकस्मिं प्रागुक्ते
त्यैव तत्र तत्र कालेवा भवतिवा रह।। केचिदग्न्यत्वाधानानंतरं प्रथमं प्रवृत्तं एव शाखाच्छेदः कर्त्तव्य इत्याहुः।तेषां
मते व्रतमुपैती त्यनेन व्रतोपायनस्यापि कालांतरविधिर्यत्क्रियतरति।। ॥मातृभिर्वत्सांत्संसृजत्यकृत्र शा
खयोपस्पृशतिवायवस्थेति।ततः शाखाच्छेदघृतोपायमनानंतरं षडुक्तान्वत्स मातृभिः सहसंयोजयवाय
वस्थेति मंत्रेणामात्रा संगतं वत्सं शाखयोपस्पृशति।उपसर्जनेनमातुरुपपद्यतेतीत्यर्थः।तथा चउव

१० गार्ग्योत्वत्सानपाकरोति दर्भैर्दर्भपिंजूलैर्वेति आपस्तंबः। वत्सांश्चाखेपेत्यत्र वत्सामो हि रूपमानत्वाल्लिंगवचनयोर
विवक्षा। तेन प्रतिवत्समुपस्पर्शनं शाखयापाकर्त्तव्यं। लिंगसंख्याविवक्षितत्वाद्यस्त्रीवत्सा अपि गावः स्यात्तास्वार्थं दोग्ध्याः
अग्निहोत्रे पुंवत्सामिति प्रत्यदर्शनादमत्रापुंवत्सापि भवतीति प्रतीयते। परिवत्सशब्देन वत्सतर्यप्यभिधीयते।
तदेवैतदुपपद्यते। वत्सानित्यत्रयाप्यपशुबंधेष्वतरुणेषु स्त्रीरित्युक्ते अतरुणेष्विति स्कन्धात्तरुणेषु पुंश
ब्दः। ततश्च स्त्रीवत्सा अपि गावः सांनाय्ये भवंति॥ ॥उपापवत्स्येति वेके। एके आचार्या वापवत्स्येत्यभिमंत्रेण
पापवत्स्येति विशेषं तु वेति एतच्छाखयोपस्पर्शनं संमोजितानां वत्सानां मातृभ्यः पृथक्करणार्थं॥ ॥देवो व इति मातृ
णामेकां व्याकृत्य। ततो वत्समातॄणां गवां मध्ये एकां गां वत्सेन वियोज्य देवो व इत्यनेन मंत्रेण तां गां शाखयोपस्पृ
शति। अनेकयजमानके च ध्रुवा अनयोर्गोपत्योः स्यातेति ध्रुवा एषु गोपतिषु स्यातेति यथार्थमूहः। अत्र एकस्या
गोरुपस्पर्शनेन सर्वासां गवां संस्कारो भवति। मंत्रे आप्यायध्वमघ्न्या इति बहुवचनदर्शनात्। अतो बहिर्निरधं
रमित्यत्रेमं त्रयोदशो भवति। आपापस्तंबोपीति। अपरे तु उपस्पर्शनस्य संनिपत्योपकारकत्वादेकस्या एव गो
रयं संस्कार इत्याहुः। तेषां मंत्रगतं बहुवचनं पूजार्थं॥ ॥एवं न वर्तिमा हिंस्या। तस्मात्रात्यं हविरिंद्र इंद्रदेवत्यं भ एम
वति महेंद्रदेवत्यं वा। गोरुपस्पर्शनमंत्रे इंद्रस्येव दर्शनात्तस्येव देवतात्वमाप्नदिति माहेंद्रं देवतमुक्तं। तदेके मह १०

इहैवस्तंवा।गोरूपस्पर्शनमंत्रे इंद्रस्येवदस्रो नाम्नस्येव देवनाल माम हिरिति माहेंद्रं वेत्युक्तं।तद्धेके महेंद्रायेति तुवती तिष्कृतेः।आपस्तंब नागतश्रीर्महेंद्रं यजेत त्रयो ह वै गतश्रियः परस्म केमोवौ गौतमो भरद्वाजस्तेनं तरस्तोमेज्या या महेंद्रं इयजेरन्नलितरे संवत्सरमिंद्रमिष्ट्वाग्नेयेव्रतपतयेष्टाकपालं निरूप्य ते महेंद्रं यजेरन्निति॥ ॥यजमानस्य पशून्निसभ्यागारस्याग्रतरस्य पुरस्ताच्छालावामुपगूहतिद्वेसभ्यागारे आहवनीयागारं गार्हपत्यागारं वा।तयोरग्न्यगारयोरग्न्यगारयोरग्निगृह्णमेधे मतरस्याग्न्यगारस्य आहवनीयागारस्य पुरस्तात्स्वेह्योष्वेभागेवागार्हपत्यागारस्य वा पुरस्तात्पूर्वभागे वा शालामुपगूहति यजमानस्य पशूनिति मंत्रेण।अस्य वानेकयजमानके यजमानानां पशूनिति यजमानयोः पशूनित्यूहः।पशुं पाहीति ब्रवह मीरधनिराजसूपे॥ ॥मूलादुपवेषं करोतीति वेषोसीति मूलात् शाखामूलाद्वेषो स्यैवेष इति मं— णोपवेषं करोति।तच्च मूलं प्रथममेवच्छिन्नशाखाया मूलमरत्निप्रमाणादधिकप्रमाणाच्छिन्नाग्रं पृथक्कार्यं।तेन स्तरूपात्ययचकृ.तान्मूलान्मंत्रेणोपवेषकरणं।मूलतः शाखायपरित्यागोपवेषं करोतीति शाखांतरात्।उपवेषश्चारत्निमात्रः प्रादेशमात्रो वा परिच्छिन्नोक्तेः।तस्य च कपालोपधानार्थत्वाल्लेवलपयोर्हीवच्छु केवलपयस्याहविष्केयोपधानाभावादुपवेषकरणाभावेपि तस्मी शाखामूलस्य परित्यागस्तन मवसेव।शाखायाः परिवायेतिद्वितीयमापरित्यागस्तनस्य शाखासंस्कारत्वावगमात्पयस्यामाः पपतश्चप्राक्

११ तेषु पक्षे विकारत्वेन पर्णि वाग्नितमाशाखयोप। करणं कार्यं। प्रकृतौ हि परिवासितपाययन्ती पाकरणामिति।। सान्नाय्यवि
शाखासंयोगात्। इदं शाखामूलादुपवेषकरणं सान्नाय्ये सत्सान्नाय्यकरणे शाखैव भवति। नास्त्रा सान्नाय्यकरणे होयो वे
ष्मासं वा। कस्मात् शाखासंयोगात्। शाखां परिवास्योपवेषं करोतीति वचनादुपवेषस्य शाखासंबंधस्यावगमात्। शा
खाश्च वत्सापाकरणार्थत्वादसान्नाय्यके च वत्सापाकरणार्थायाः शाखाया अभावान्न संबद्धस्य तस्या उत्पाद्यमानस्यो
पवेषस्याभाव एव युक्तः।। ।।उपधानादौ मप्योग्वाशाहूः पूर्वं एतन्निर्णसार्थः। उपधानान्तमुपवेषस्य कपालोपधा
नार्थत्वान्तस्य वत्ससान्नाय्यके असान्नाय्यके च कर्मत्तिभावादुभयत्रोपवेषो भवत्येव। ततश्च शाखायाः। अभावे चा
रणो भवति। यतस्तं विना तेन मध्योगापानुहृहती मारिनस्ति इत्यति।। ।।वसोः पवित्रमिति पवित्रमस्यां बध्नाति
नुरोः। वसोः पवित्रमसीत्येतावता मंत्रेण अस्यां शाखायां कुशाग्रे वद्धमाग्रे दर्भत्वणे एव पवित्रं बध्नाति।। ।।त्रि
वृता।। अथवा त्रिवृतं पवित्रं बध्नाति त्रिवृदिति त्रिशलाकं। त्रीणि दर्भतृणानि समर्थः। हस्तेन प्रादेशमात्रं तु त्रिवृद्
त्वा पवित्रकमित्यत्र त्रिवृत्त्रिशलाकमिति हेमाद्रिणा एवं व्याख्यातत्वात्। मानवे विशेषः। दर्भमयं पवित्रं त्रिगु
णं रज्जुः शाखायामनुलोममवधत्ते इड्ढ्वि मनुर्वेत्रि इति।। आपस्तंबः।। त्रिवृद्दर्भमयं पवित्रं कृत्वा वसूनां पवित्रम
सीति शाखायां शिथिलमवसजति मूले मूलानि अग्रे अग्राणि न ग्रंथिं करोतीति। तत्र विनिश्चयो त्रिवृतां निर्मितमिति एन

११

केचित॥ येसां कालनियमो। केचित्पवित्रबंधनानंतरं त्वाख्योपग्रहणं कुर्वंति। तथासत्युपग्रहणस्य आख्यायाश्रुताशार्थत्वेन दृष्टा-
र्थता भवति। पाठक्रमेणालब्धार्थता। न चात्रो दृष्टं भवति युक्ता। तेनात्रोपग्रहणमिति। अपरे तु वत्सापाकरणानंत-
रं पाठक्रमेणैव कुर्वंति॥ ॥एवमप्यग्निहोत्रहोमः सत्र पतत्काराविं। तेन मतः स्रोत्राप्य दुग्धं दधिहूयं हविःकुर्वंतोप-
जमानस्य तां रात्रिं तस्याममावास्यायां बंधिस्वा तत्र्योयवाग्वायवाहूतं तेनइष्येणाग्निहोत्रहोमः सायंप्रातर्भवति। तेऽ-
ले: शिथिलपक्वायवागूरित्युच्यते॥ एषा यवागूरिति धृत्ते त्वाभी। तेन यतइति विज्ञेयत्तो याहानादस्त्व पतो नवो-
ग्वाहोमनियमः। नापि वहृसान्नाय्यालाभ इति साध्यन्त्राप्यस्थाने न्वहूकरत्तो॥ ॥आपस्तंबः॥ ॥अमावास्या-
मां एतां आसत्यं यजमानोऽग्निहोत्रं जुहोति। अग्निहोत्रे छेषत्ता मातत्र नार्थे निरुध्यतीति शूर्पे पात्रहृ येनर आग्रातंवत्रा-
नेतरं यवागूर्वोषस्य दोहमध्येप्र हूयउ क्रोत्ति। तदर्थमेतत्स्वत्र्योषणां॥ मानवे च॥ एवा वै तां रात्रीं यजमानोऽग्निहोत्रं
जुहोति न स्याः पिंडं निरद्धादिति॥ ॥हुत उपस्थानमब्रूताहिरमाह। हुतेग्निहोत्रे उपस्थानमिति होरध्वर्युं प्रत्याह।
हे होरध्व उपस्थावत्स्नेन यजमानं गां सांप्रति यब्रूतादिति प्रैषार्थः॥ ॥गोत्केघोरसीति स्थासादानं। होत्रध्वर्युं प्रत्युपस्थ-
हेति प्रत्येक यति वचने धर्वुं र्घोरसीतिमंत्रेणास्थासान्यासादानं करोति। गोरुपस्थावत्सेन संगतवयस्थासादानादि-
कर्तव्यं भवतिति कुर्विति प्रैषार्थः। आदानं चाधिश्रयणार्थं तेन वायव्येपयस्य अधिश्रयणाभावारनादानमिति

कर्कः। तदप्युक्तं। तेनैव वपाश्रपणीपोरधिश्रपणाभावेपि तद्दानमंत्रेणूहस्योक्तत्वात् तस्योक्तविरोधात्। अधिश्रपणाभावे
पिद्धवित्यर्द्देनेस्थापनमवश्यं कर्त्तव्यं। तदर्थमप्यादानेमंत्रो भवत्येवेत्यपरे। स्थालीस्थानापत्यापशोर्वपाश्रपण्यो
रादानेमंत्रस्यायोस्थः पृथिवीस्थ इत्यूहः। आलादाने उल्कादाने चान्वहितस्यैव॥ ॥मातरिश्वन इत्यधिश्रयति। मात
रिश्वन इति मंत्रेण स्थालीं नार्हपत्येधिश्रयति। आहवनीयपक्षापिरास्याहवनीय एव। अत्र मातेयं तु पतीद्वार्णामि
तिद्वियजमानके मातेयं तु पतयो द्वार्शुरिति बहुयजमानके ऊहः॥ ॥वसोः पवित्रमसीति पवित्रमसां करोत्युदग्वा। व
सोः पवित्रमसीत्यनेन धारामितिमंत्रेण स्थालीं स्थालीं पवित्रं करोति। स्थालीमाउपरिस्थापयति प्रागग्रमुदगग्रं वा।
ओतं चेतत्प्रागुदगग्रत्वं। अथ पवित्रं निदधाति तदुक्तं प्राङ्गिदध्मत्वा वीहि हेवानां दिग्गशो उदगिति श्रुतत्वात्।
प्राक्तीयं पवित्रमादधातीति पंचत्रातरीति मानवे। ततश्च प्रासी पयारे ओतं प्रापश्चित्तं भवति। केचित्पवित्रं शाखा
पा विपोत्स्यस्थाल्यां निदधाति। दोहानंतरं च पुनः शाखापां बध्नंति। अमे तु शाखावबद्धमेव शाखापां निदधाति॥ ॥वा
यतो दोहयत्स अस्रेण। अथ धर्मुवागपतः सत्वस्थूरेणाथूरस्थातिरिक्ते नश्रोमणान्तत्रिपवेरूपादिना पुरुषेणा गां
दोहयति। दोहयतीतिणिंचतो यदेशाज्ञां धुक्तेति दोग्धारं प्रेष्यति। ततएवं। प्रेषितो दोग्धा गां दोग्धि। आपस्तंबः॥ न
शूद्रो दुह्यात् दुह्याच्छूद्रो हव्यात्रे दोग्धीति॥ ॥ स्थाल्यामत्ताहृद्वे यस्त्वे सानिध्यमाने जपति। स्थाल्यामानन्वारब्धेप

दप

जमाने दोहानंतरं दोग्धारं दोहनपात्रे शौ वत्स्यात्स्यामासिच्यमाने प्रपतिरेवष्वित्यनुमंत्रमध्वर्युर्जपति॥ ॥कामधुक्त इति प्र
श्नः। कामधुक्षः कां गां दुग्धवानसीत्येवं दोग्धारं प्रति प्रश्नः कर्त्तव्यः॥ ॥सोक्ते साविश्वायुरित्याह। होधमसम्रमामितिश्रो
नाम्त्रिमोक्ते अध्वर्युप्रति कश्चितेध्वर्युः साविश्वायुरित्यनुमंत्रं प्यात॥ ॥एवमितरे उत्तराभ्यां प्रतिमंत्रं। एवमेव अ
नेनैव प्रकारेण गां धुक्षे साविन्नाइतरे द्वे गावौ दोहयति। इयांस्तु विशेषः। साविप्याद्युरिस्म स्मरुच्छनेगोनामकप
नानंतरं उत्तराभ्यां साविश्वायुरिसस्मान्मंत्रारवंतरं पठिताभ्यां मंत्राभ्यां साविघ्न कर्मा। साविष्व धपा इत्येताभ्याम्प्र
तिमंत्रमेवैः कामभिरद्धाति। साविघ्नकर्मेति द्वितीयां। साविश्वधपमाइति तृतीयां। एवं शब्देन प्रैषादिसर्वं
मेतिदिश्यते। तेन दोहनमेवंः दोहने। स्थाल्यामनन्वारब्धे यमानेकुः। आसिच्यमाने जपः। कामधुक्षः। कं
यनं। मंत्राभिधमनुव्रवति॥ विसृष्टवाग्युत्तराग्निमन्वारब्धे। तिसृणां दोहनानंतरं विसृष्टवागध्वर्युरुत्तराग्निनाग्नौ दोहयति
पूर्ववत्। तत्र विशेषः। स्थाल्यामनन्वारब्धे यजमाने ताम्र्यपयः आसिंचति। तत्र गां धुक्षेति प्रैषः। दोहनं आ
सेकजपौ। एतावदेव वाक्त्रयं भवति। उत्तरादत्र बहुवचनं अवणां संख्यासंदेहे निरूपयाध्यमाह॥ यावत्स्वमधिका
रात्। यावन्मः स्वा आत्मीयाः याव स्वां यावद्वधसरणादस्य यमीभावोपं। यावत्स्याद्यात्मीयागावोभवति त्रिप्रभृ
ति तावतीः सर्वा अपि दोहयति कुतः अधिकारात्। तावतीनां सर्वासां दोहने अधिकारो ह्लिपतः॥ ॥तिस्रोवा

२३ यमंतितावतीः सर्वा अपि रोहयति कुतः अधिकारात् । तावतीनां सर्वासां रोहणे अधिकारो नियतः ।। ।। तिस्रो वा नित्यत्वात्ता वा
नाहः पत्न्या वरोहति स्वपदयुग्धं तेनाधिकारः । कस्मान्नित्यत्वात् । त्रित्वे बहुवचनस्य नियतत्वात् । न तु चतुष्टादावपि ब
हुवचने नित्यमेव । तत्राह ।। ।। आदितः सामर्थ्याद्धाय यद्यपि च चतुष्टादावपि बहुवचने नियतमेव । तथाप्याहि सामर्थ्यात्
त्रित्वातमेवाद्यं । प्रथमातिक्रमे कारणाभावादिति न्यायात् । तिस्रो दुग्धता वत्सेव शाखार्थस्य कृतत्वात् किमर्थमधि
कानां रोहणं ।। ।। स्त्रीनाम् उत्तरेष्वेव नमुक्तन्यायेनैव तिस्रो दुग्धे तेष्वपि तु अतो दर्शनाच्च । श्रुतौ ह्येवं दम्पतेमपापा बहु
वचने नत्रित्वं स्वैव परिग्रहत्वात् इति । तथा च अश्वमेधे त्रिस्रा वै श्वदेव्याः । हृत्सत्री वा आग्नेयः श्वेतो वा पथ्याः श्वे
ताः सोमा रत्नं बहुवचनेनैव पशवो विहिताः । तथा कपिंजलाद्योपि न्यायेन बहुत्वविशिष्टा एव विहिताः ।।
तान पद्येव तेषां संख्या यद्वेधनं श्रुयते स तत्र शैव पथ्यम धामेश्व आलभेत षोडश षोडशो तरङ्गा त्रयोदश त्रयो
दशारण्याः नाकारोषा लभन्त इत्यादि । संख्योपयेधनं वन्तरे वो पेप घतेप्य दा बहुवचनेन मिति संख्याविशिष्टा
स्वगर्भ्यं तेनाधिकारः । अतो त्रापि तिस्र एवोनरो रोहणीयाः ।। ।। परिस्तानवनमानपतिसं एवाधमिति । पत्न्याः धो
दुग्धा सैकानन्तरं रोहणपात्रस्य परिक्रांत्वं नः सालनीरवं स्थालीस्थ दुग्धमध्ये तिन पति स्नान्य धगतावशिप
नेन मंत्रेण । स्वार्पुः सोहतोत्रे मरपीनत्वात ।। ।। उद्धास्यानन्तरं किं मार्गेण तरो वेरोर इस्य हो ति । तं दुग्धस्थाली सु राम
२३

दोहार्थं वक्ष्यति हि निरूप्याज्यं प्रातर्दोहं नमन्यस्मिन्निति। नपैव शाखयादर्भिर्वा सायंदोहवत्प्रातर्दोहाय वत्सानपाकरोतीति॥ ॥ आनयन्नेषा ऐंद्राग्नश्च द्वादशकपालोऽसंनयतः। प्रातः प्रतिपद्दिदाशीघ्रादिविशेष उच्यते। आग्नेयोऽष्टाकपालः पुरोडाशो भवति। असंनयतः सान्नाय्यमकुर्वता यजमानस्य द्वादशकपालगऐंद्राग्नः पुरोडाशो द्वितीयं हविर्भवति। असंनयत इति विशेषितत्वात्संनयत ऐंद्राग्नो न भवति॥ ॥ निरूप्याज्यं प्रातर्दोहं न मन्यस्मिन्। आज्यं निरूप्याज्यनिर्वापानंतरमस्मिन्निति सायंदोहपात्रादन्यस्मिन्न्यात्र प्रातर्दोहनं कर्त्तव्यं। आज्यमस्मिन्नित्युक्तत्वात्स्मात्सायंदोहस्य तत्पात्रस्थस्यैवातंचनं। निरूप्येति पूर्वकालतामात्रेक्ताद्देशोऽपेक्ष्य पूर्वमानकर्तृकत्वतायां। निर्ज्ञातकर्तृकत्वात्। आपस्तंबः। उपधमयकपालानि सायंदोहवत्प्रातर्दोहं दोहयत्प्रातंचनापिधानेनेति धानं च निर्वर्त्तत इति॥ ॥ परिक्षालनवर्जं च सायंदोहमाहरस्प्रातर्दोहं ट· अपयित्वाभिघार्योद्वास्याभावनक्ति। अनुपस्पृष्टं प्रकृतादित्यादिपरिक्षालनमानयतीति तं सायंदोहं ऋकृत्वा ततः प्रातर्दोहं देवस्त्वानि मंत्रेणाश्रपयित्वा ततः सायंदोहमाहृत्य प्रातर्दोहमेवाग्निप्राप्येनततस्तद्वाऽस्य पुरोडाशो ज्ञातानंतरं यत्ते प्राणादिति मंत्रेणानौ सायंप्रातर्दोहौ क्रमेणानक्ति। अत्र प्रातर्दोहं श्रपयित्वाभिघार्येति प्रातर्दोहस्यैवाभिघारणाविधानात्। अंजनेऽप्यभावितिविशेषोपादानाच्चाभिघारणं पयस्स्वनदध्न इति प्रतीयते। अंजनं तु प्राणादानमेव। प्रज्ञाताव्यनक्ति यत्ते प्राणा इत्युक्तेः। अत्र प्राणादानादयः। संस्काराः प्रयसं दध्नः कार्यास्ततः पयसः। अवदानं तु पयसः पूर्वं वचनात्॥ ॥ शृतस्याग्रेवद्यतीति श्रुतेः। शृतस्य दुग्धस्य प्रथममवद्यतीत्यनुज्ञामवदानकाले। ततो दध्नः। कुतस्त्वं क्रमेणावदानं इति श्रुतेः। शृतस्याग्रेवद्यतीत्येवं विधयपाः शाखांतरोपायाः श्रुतेन तस्यायविह

रतंत्रद्वारा। प्रागुक्तशेषेण हुत्वेति। गेहे हुताग्निहोत्रशेषेणादुष्टं दुग्धमातनक्ति प्रादिनहोमावशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधि संपन्न
यंइंद्रस्य त्वाभागमिति मंत्रेण। अत्र विप्रतिपत्तिः। कश्चित्प्रातर्होमशेषेण तंचनं कुर्वंतीति। कश्चित्प्राग्दिनसायंहोमशेषेणेति। के
चिदुभयहोमशेषेणेति। शाखांतरे चोपवसथस्य पुरस्तादेकाहे द्व्यहे वा तंचनस्योपकल्पनमुक्तमस्ति। अग्निहोत्राच्छेषेणाद
ध्मातनक्तीति। तद्दिने सायं हुत्वावशिष्टपयसा गवाऽपिंडमग्नदधमातीति मानवः। आपस्तंबसूत्रे च॥ एकस्याहूयोऽग्निस्तेणेवे
कारे द्व्याहे त्र्यहे चतुरहे वा पुरस्तादुपवसथाद्दानं चनार्थे दोहयित्वा तेन शीतबुध्नेनातनक्तीति। अग्निहोत्रोच्छेषणमन्व-के
यति चात्र तत एव चातुर्द्दश्यां रात्रौ दध्याग्निहोत्रहोमः कार्य इति प्रतीयते। हुतशेषस्थालीलौकायास्थानमनुगतः। कश्चिदमावास्या
यां सायं यवाग्वाग्निहोत्रं हुत्वा तच्छेषेण यवाग्वा तंचनं कुर्वंतीति। तदसंगतं। तस्या तंचनार्थत्वाप्रसिद्धेः शाखांतरविरोधश्च। शाखां
तरेष्वग्निहोत्रोच्छिष्टेन दध्यातनक्तीत्युक्तं। तथा तच्छेषणाभावे तंदुलैरातंच्यात्तदभावे ओषधिभिरिति। काठके च॥ यद्याग्निहोत्रोच्छि
ष्टं न विंदेत्तंदुलैरातंच्याद्यदि तंदुलान्न विंदेदोषधीस्तैरातंच्यात्सर्व्वबकुलकुवलवर्ज्जमिति॥ ॥सारकेनापिदधात्समृन्मयेन वि
ष्णो हव्यमिति। आतंचनानंतरं सोदकेन जलवता ऽनेन पात्रेणामृन्मयेन मृन्मयवर्जितेन दोहस्थालीमपिदधातिदं कप
ति। विष्णो हव्यमिति मंत्रेण। मानवे॥ सोदकेनापिदधाति दारुणपात्रेणायस्पात्रेण वा यदि मृन्मयं स्यात्तृणं दारुवांतर्द्दधा
ति। एवमेवापस्तंबसूत्रेपि॥ काठके च॥ निधायवक्ष्मापाकरणं पूर्ववत्। तां दोहस्थालीं सुगुप्तदेशे निधाय पूर्ववत्क्ष्मापाकर
णं कार्यं। तच्च मातृभिर्वत्सैः सज्जवक्रेशाखयोपस्पृशति। वायव स्थेत्येव मातृभ्य अन्यतरां गोदुहः शाखयोपस्पृष्टानां तं कुर्यात्। तच्च प्रात

इध्वाद्युस्रूपादानं । इध्मेबर्हिः प्रथममुपसन्नि रिति । इधिपपयोःस्रुवेणा द्विरवदानं प्रत्येकं । तंत्रेणोपस्तरणाभिघारौ । सहप्रदानं चदेव
तादेवतागुणयोरेकत्वात् । तदुक्तं नद्रव्यभेदेगुणयोगादिनिवाप्स्पृशति । स्रुवेणाज्यमाज्याप्ययोरवद्यती सापस्तंब ॥ ॥ समस्यमा
र्जनं शाखापवित्रं प्रतीतासु निहितेपवित्रे चसमप्यनष्टांते यन्मार्जनं विहितं न कर्त्तव्यं । मार्जनानंतरं चशाखापवित्रं शाख
यामेवकर्त्तव्यं । प्रस्तरेस्करणं कुतस्य न भवतिउत्सुक्तं प्राकृ ॥ ॥ इंद्राग्न्योरिति व्यूहनं । इंद्राग्न्योरूक्तिति मितमनेनमंत्रेणास्कन्दूह
नं भवति । ननु चयथा । इवन्नम न्यादिसुकचान्नवक्तव्यमेनतास्त्यं । इंद्राग्न्योरिति सस्यमंत्रस्यामावाप्याः योविनियोगज्ञापना
र्थंचात् । अन्यथाप्राहिनापूर्वोत्तइत्तिपरिभाषितत्वादिंद्राग्न्योरिति सस्यमंत्रस्यपूर्वमंत्रशेषता स्यात्तन्माभूदितमतउक्तमिंद्रा
ग्न्योरिति व्यूहनमिति ॥ ॥ सहशाखयाप्रस्तरानुप्रहरणं प्रपदासक्तवाकांते प्रस्तरानुप्रहरणंक्रियतेतदाशाखयासहकर्त्त
व्यं । प्रस्तरेणासहवस्पापाकरणार्थेशाखापात्रअथाहवनीयेप्रक्षेपः कार्य्यः ॥ ॥ परिधीन्निःसहोपवेषंजुहोतिजुहोमिद्धेतिपदाप
रिध्यनुप्रहरणाप्रच्छर्यः कुर्यात् । तरापरिधिभिः सहैव विशेषः धमदग्नीछाखापलाउत्पादितमुपवेषंजुहोति वेतिमंत्र
णपतिपत्तिरियं चरितार्थं स्यात् । नास्याहोषाहोसहकृत्यितेनाज्येनहोमः । वारणस्योपवेषस्यहोमः । पोर्णमासप्र
करणउपवेषहोमस्याविधानात् ॥ ॥ पौर्णमासवदमसघः । उक्तार्थमसर्वे पौर्णमासवद्भवति । एतावालि
शेषः । अमसघः पौर्णमासेतुप्रधानाप्रातरितिपक्षेत्र अग्न्याधानादिकर्मोपवर्गान्तसमपंत सघस्त्वमुक्तमास्ति

१५ तदिह न भवति ॥ ॥ सोमयाजीनं नयेत। सोमयाजी सन्नयेत सान्नाय्यं दधिदुग्धरूपहविर्द्वयममावास्यायां कुर्यात। सोमे
नाग्निष्टोमादिना य इष्टवान् स सोमयाजी। तस्य सान्नाय्यनियमः ॥ ॥ कौमारादितरः। तस्मादप्यसोमयाजी सन्नये वनयेदिति श्रुते
रितरो। सोमयाज्यपि कामादिच्छया सन्नयेत। अमावास्यायां सान्नाय्यं हविः कुर्यात ॥ ॥ त्रिंशद्वर्षाणि दर्शपूर्णमा
साभ्यां यजेत। उक्ताभ्यां दर्शपूर्णमासाभ्यां त्रिंशद्वर्षाणि यजेतेति श्रुतेः। सान्नाय्यस्य प्रस्तुतत्वात्सान्नाय्ययोरेव द
र्शपूर्णमासयोरयं नियमो। दाक्षायणयज्ञसंज्ञकदर्शपूर्णमासयाजी पंचदश वर्षाण्येव यजेत। न त्रिंशद्वर्षाणि
यद्यदाक्षायणयज्ञी यावदप्यपि पंचदश वर्षाणि यजेतेति श्रवणात। दर्शपूर्णमासावेव गुणविकृतौ दाक्षायणयज्ञो
न ततः कर्मान्तरमिमौ एव संति गुणविधानं वा सन्निधिमपहृत्य नाम्नापि स्यात ॥ ॥ अग्निहोत्रमेव वा जुहुयात। माकृत
दर्शपूर्णमासयोर्हि त्रिंशद्वर्षानंतरं दाक्षायणयज्ञकृतदर्शपूर्णमासस्य पंचदशवर्षानंतरं च केवलमग्निहोत्रमे
व जुहुयान्नान्यत्किंचित्कुर्यात। केचिदेवशब्दमिवार्थे आचक्षते। अग्निहोत्रमिव वा जुहुयात। यथाग्निहोत्रं या
वज्जीवं जुहुयात। तथा दर्शपूर्णमासावपीति। उभयत्र यावज्जीवमनुष्ठानश्रवणात। यावज्जीवं दर्शपूर्णमासा
भ्यां यजेत। यावज्जीवमग्निहोत्रं जुहुयादिति। अतस्त्वन्यथाश्रवणात विकल्पः। यावज्जीवं दर्शपूर्णमासयाः
कार्यः त्रिंशद्वर्षाणि वा। दाक्षायणयज्ञे पंचदश वर्षाणि वेति। अत्राह आपस्तंबः ॥ स्वर्गकामो दर्शपूर्णमासावे एम
१५

ककामः सर्वकामो वा युगपत्कामयेताहारस्थलेवा। यावज्जीवं यजेत त्रिंशतं वर्षाणि जीर्णो वा विरमेदिति। अत्र याव
ज्जीवादिसंकल्पः। दर्शपूर्णमासोपरमे तद्विकाराणामप्युपरमः तत्प्रकृतित्वात्। हविर्होमाग्न्युपर्णांक्रियपते। सोमानामपि
निवृत्तिः। केवलमग्निहोत्रेमित्युपदेशः। अग्निहोत्रमेव जुहुयादिति निहिकासायनमिति। धूर्त्तस्वामी॥ ॥ आचार्यास्त
धर्मे कौर दर्शपूर्णमासावुक्तौ। अथ तद्विकाराणि निक्षिपभ्याहात्सवरिष्यशौर्यं चरुं निर्वपेदग्नीषोमीयमजमालभेतेत्येव
माद्यानां विकृतीनां चोदनानां यजतित्वनिरूपणपूर्वकं तदुपयुक्तां सामान्यातिदेशविशेषातिदेशोहबाधाल्पवि
कृतिकालं च निरूप्य दाक्षायणयज्ञं वक्ष्याति। ननु दाक्षायणयज्ञोत्तमनंतरमतिदेशादिनिरूपणीयं। तस्यापि गुणभा
त्वविकृतदर्शपूर्णमासत्वेन प्रकृतित्वात्। सत्यं। दाक्षायणयज्ञे पपीस्या विद्यते। अमावास्यायां पयस्या मैत्रावरुणीति।
तस्याश्च सान्नाय्यपयोविकारत्वादतिदेशादिनिरूपणाधीनात्तत्र पयोधर्माणां प्राप्तिः। तेन प्राग्दाक्षायणात्तद
तिदेशादिनिरूपणं युक्तं। इदानीमिदं विचार्यते। सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः। अथ बार्हस्पत्यं चरुं निवा
रसप्तदशशरावं निर्वपति। अथ सारस्वतं चरुं निर्वपति। अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते। स एतमा
श्विनं धूम्रमालभेत। अग्नीषोमीयमजमालभेतेत्सैवमाद्याः सर्वे विकृतीषु चोदनासु किं व्रीहीनवहंति। व्रीहीन्प्रोक्ष
तीतिवद्धाउक्तनिर्वापान्तं भरूपसंस्कारमात्रविधिः उत मागाद्विधिरिति। तत्र धर्मस्य ज्ञोह्मलेस्यारराहमनपे

संस्तारिदिति मायेन निर्वापालंभमात्रं प्राप्नोतीत्यत आह ॥ ॥ २ ॥ ॥ चकर्मेशब्दो द्रव्यदेवतायुक्तो यजतिः ॥ द्रव्यदेवतायुक्तः कर्मेत्य
र्थः ॥ त्रिपा २ ॥ आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः ममेत्यकः ॥ यागोद्देशपरस्सर्धः ॥ ततश्च सोमं वै ग्रहमग्नीषोमी
यमजमित्याहो द्रव्यदेवतासंयुक्तो निर्वपेदालभेतेत्यादिरिति प्रत्ययान्तः शब्दो यागविधायको न निर्वापालंभरूपतत्का
रमात्रविधायक इति तेषां ॥ यद्यपि यजतिरिति शब्दो यजिधातुमेवाभिधत्ते इक्श्तिपौ धातुनिर्देशे इति स्मरणात ॥
तथाप्यत्र तदर्थयागपरो ज्ञेयः ॥ धातोर्द्रव्यदेवतासंयोगाभावात ॥ तदर्थस्य यागस्य तु द्रव्यदेवतासंयोगः स चकारेणो
याभिहितो यस्संख्यासामो द्रव्यदेवतात्याग इति देवतोद्देशेन द्रव्यस्य यस्त्यागः स याग इति ॥ न केवलं स चकारेणोक्तो द्र
व्यदेवतोक्तस्य निर्वपेदालभेतेत्यादिकस्य कर्मशब्दस्य यागविधायकत्वमुच्यते किंतु श्रुतिरपि निर्वपमाहेश
द्वे श्रुते यागं दर्शयति ॥ अथ मैत्राबार्हस्पत्यं चरुं निर्वपतीत्युपक्रम्य तयोरुभयोरवदायाह मित्राबृहस्पतिभ्यामनुब्रूही
त्याश्राव्याह मित्राबृहस्पती यजेति वषट्कृते जुहोतीति सहानुवाचनविधिपरे वाक्ये यागं दर्शयति ॥ तथा वाजपेये पशु
षु ॥ अथ सप्तदश प्राजापत्यान्पशूनालभत इत्युपक्रम्य प्रजापतय इत्युपांशूक्त्वा छागानां हविषोनुब्रूहीति प्रजापतय इ
त्येवोपांशूक्त्वा छागानां हविः प्रस्थितं प्रेष्येति वषट्कृते जुहोतीति तथा अग्नीषोमीये आश्राव्याहाग्नीषोमाभ्यां छागस्य ह
विषोनुब्रूहीत्याश्राव्याहाग्नीषोमाभ्यां छागस्य हविः ॥ प्रेष्येति वषट्कृते जुहोतीति प्रैषविधिपरे वाक्ये यागं दर्शयति ॥ ननु एम

मंत्रनिर्वापादौ विहिते यागोद्दूपतेन तत्तत्तथा भवतु। अमंत्रं न भविष्यतीति शंका न कार्या। समानमायेन तु दर्शन प्रसिद्धा
त्साएव कृतिच्छ्रुतेर्ज्ञानेन सार्वेषां श्रुतेर्ज्ञानवदमंत्रापि तथा कल्पनात्। तस्मादेवमादौ यागविधिरिति। एवं यागलेति
द्रपि दृहसंदिह्यते॥ सोयं चरुं निर्वपेदग्नीषोमीयमजमालभेतेत्यादौ क्वचित् यागमात्रं भवति उभ धर्मोपि भवति। पदार्थध
र्मो भवंतीति प्रस्थलद्यापि संदेहः किं पूर्णाहुतिसंबंधिनो धर्मा भवंति उताग्निहोत्रसंबंधिनः। आहोस्विद्दर्शपूर्णमासयोः। अ
थवाग्निष्टोमस्येति। अथवा दर्शपूर्णमासयोरेवेति। प्राप्नोति। धर्माणामनाम्नानाद्यथाश्रुतं यागमात्रं कर्त्तव्यमिति
एवं प्राप्ते आह॥ दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्। सौर्यादौ धर्मा भवंति न यागमात्रं। कस्मात् सामर्थ्यात्। ए
वमेतानि विधिवाक्यानि समर्थानि सामर्थ्येवेति समर्प्येजनानि भवंति। अन्यथा साकांक्षत्वादर्थप्रतिपादनाभावेन निरर्थका
न्येव स्युः। तथाहि। सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशत्रयवती भावना विधीयते किं केन कथमिति। तत्र
किमंशो ब्रह्मवर्चसं। केनांशः सौर्येणेति। कथमंशस्तु वाक्यमध्ये नास्तीति न कथं भावयेदिति वाकांक्षे कथमंशसापे
क्षं। प्रकृसापेक्षं भवति। तदध्याहारेणानुषंगेण वा दूरस्थित्वा निराकांक्षं कर्त्तव्यं। अन्यथा तस्यानर्थक्यापत्तेः। न च
वेदे मात्रामात्रस्यापि तद्दृश्यते। तस्मादत्र निराकांक्षीकरणमविध्यतेतिकर्त्तव्यतापरपर्यायः कथमंशः कस्मिंश्चिदनु
षंजनीय इति सिद्धे आह। दर्शपूर्णमासधर्मा इष्टिपशुष्विति। सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयो

रेव धर्मा भवंति । न द्रव्याद्युपकारे । कस्मात्सामर्थ्यादिति सर्वोऽपि एवंहेतुरत्रापियोज्यः । दर्शपूर्णमासधर्मा एव सौर्यादिविधीनां
चोपी भवितुं समर्थाः । यद्यपि पुरोडाशाद्योऽवघातादिभिरेव सिद्ध्यंति नाभिघारादिभिरिति । किंच । व्यक्तचोदनाचोदित
त्वं तद्धितेन देवतानिर्देशाच यद्द्रव्यकत्वमित्यादीनि दर्शपूर्णमासाग्नेयादिचोदनया दृष्टसंबंधानि सौर्यवाक्ये विध्य
तोपेह दृश्यमानानि तां चोदनामुपस्थापयंति । सा च स्वार्थमुपस्थापयति अंगजातप्रवर्तीभावनायांतस्याः सार्थःत
तः किमंशकेनांशयोरिह मत्वा तावदनारभ्यवद्यमंशो विध्यंतधर्मोपरपम्यो पोगृह्यते । एवं सौर्यादिविधीनामाग्ने
यादिविधिसारूप्याद्दर्शपूर्णमासधर्मा एव सौर्यादिषु भवंति नाग्निहोत्रादीनां सारूप्याभावादिति । इष्टिपशुषु वि
सत्त्वेहि पशुसवनीयेषु पशौ चाग्नीषोमीये एकस्मिन्निति व्याख्येयं । पश्वंतरेष्वग्नीषोमीयधर्मा भवंतीति सूत्रकारातव सू
ति अग्नीषोमीयपात्पशुष्विति ॥ ॥ दर्शनाच्च । न केवलं सामर्थ्याद्दर्शपूर्णमासधर्मा इष्टिपशुषु भवंति । अपि तु श्रुतौ
विकृतिषु दर्शपूर्णमासधर्मप्रवृत्तेर्दर्शनाच्च । तथाहि । आग्नावैष्णवीमिष्टिं निर्वपतीत्युपक्रम्य पठ्यते । तस्य प्रया
जेषु तायमानेषु आग्नावैष्णवीस्तागाथीर्दक्षिणात उत्तरमंद्रामुदग्रे स्वपसंहतागाथागापतीति । आस्यामिष्टौ
प्रयाजेषु हूयमानेषु आस्नारास्यगाथागानं विधीयते न प्रयाजाः । ते च प्रकृतितः प्राप्ता एवानूद्यंते । अतो विकृ
तिरूपायां सावित्रेष्टौ प्रयाजानां दर्शनादप्येवं ज्ञायते दर्शपूर्णमासधर्मा इष्टिषु भवंतीति । तथा पशौ । सउ

त्तरमाघारमाघार्यासह स्फ्योपं स्रुचौ परिमेत्सृज्य द्वा पशुसमनक्तीति पशुसमंजनविधिप्रदेवाक्ये उत्तराघारं द्वयोरपति॥
अतः पश्चात्युक्तएवारद्धो नादेवं ज्ञापते पद्धो पूर्व्वस्मान्मासधर्माः प्रशो भवंतीति। तदेवं प्रकृतिवद्विकृतिः कर्त्तव्येत्ये
वं रूपेणानुमानिकवचनेन सर्वेष्विष्टिभुरत्रो पूर्व्वस्मामासधर्माभवंतीत्स कृ। अधुना तदपवादत्वेन प्रमसत्त्वयाहेन धर्म
प्राप्तिमाह॥ ॥वैश्वदेवधर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्यां। चातुर्मास्येषु वत्सारि पर्वाणि सेति॥ वैश्वदेवं। वरुणप्र
घासाः साकमेधाः शुनासीरीयं चेति। तत्र प्रथमे वैश्वदेवपर्वणि दृष्टौ पूर्व्वस्मामासधर्मा भवंति। ततोतिरिक्ता अपदे
ष्टिका अपि धर्मा भवंति। प्राचीनप्रवणे। त्रेधा बर्हिः। कुशप्रस्तः प्रस्तरो हतवासाः पत्नी वेत्येवमादयः। तत्र वरुण
प्रघासादिषु त्रिषु पर्वसु वैश्वदेवस्य धर्मा भवंति। कस्मात्। वचनात्। प्रवृत्तेश्चेति द्वाभ्यां हेतुभ्यां। वचनादित्यस्य प्रभुपदेशा
हेतुभ्यां। तेन पत्र प्रशाखेतामेव पंच हवींषि भवंतीति वचनाद्वरुणप्रघासेषु धर्मकर्तं कतंत्रे। महाहविषि शुनासी
रीये च। तत्रैव वैश्वदेवधर्माः प्राचीनप्रवणतादयो भवंति नान्यत्र मारुत्सनीकवती सांतपनी गार्हमेधीया क्रीडि
नीति आसु। अतश्च मारुत्सादिषु प्राकृतमेव बर्हिरेकधा स्तरणं। न त्रेधा। प्रस्तरोपि प्राकृत एव। न प्रस्व:। प्रसत्तव
चनातिरिश्राणि। अपेतामेव पंचहवींषीति। एतान्येव सेत छन्देन रवौ ज्ञाति सवाश्चा अग्नेयोष्टाकपाल इत्यादिनि
पंचवैश्वदेवपर्वे विहितानि हवींषि परामृशति। तानि च वैश्वदेवे पर्वणि उपक्षीणानि प्रधानयागेविष्टे

स्याग्निचैत्राभागधनुर्द्धीकरणोः सर्वांशपरिग्रयी कृतानि। अतोनेन वाक्येनैतानीत्येतद्धर्मकाणीति विधीयते। किंच मेत
नेष्व। श्रुतौ शुनासीरीये धर्मप्रवृत्ति र्द्दर्शनाच्च। तस्मादन्योपक्रिरं तूत्तरवेदिं न गृह्णाति पूर्वदाक्षेण मथं तमग्निमि
ति मंथनं प्रति विधति प्रतिषिध्यमाप्ति र्व्वकौमवति। उत्तरवेदि प्रवर्ग्यस्यपोर्युवैश्वदेवे अनावाज्यपोः प्रतिषेधो
नित्यानुवादः। ननु अग्निमंथनमपि श्रुतौ शुनासीरीये विहितमस्ति। तेषां वैश्वदेवे तु वैश्वदेवेग्निं मंथतीति। सत्यं। न मंथत्यग्निमि
ति निषेधोपि विद्यत एव। अत उभयथा अवगमात्षोडशिग्रहणाग्रहणवत् शुनासीरीयेऽग्निमंथनविकल्पः सिद्धो भ
वति। एवं प्रसक्तवचनातिदेशा मुक्ता नामातिदेशमाह॥॥ सौमिकावभृथे साम प्रतिषेधात। अवभृथे वरुणप्र
घासस्संबंधिन्यवभृथसंज्ञके कर्मणि सौत्रामणीदार्वैहूतावभृथे च होमा न सौमिकावभृथधर्मा भव
ति। कुतः। साम प्रतिषेधात। तत्र न साम गीयत इति सामगानस्य प्रतिषेधात्। सामगानं च सौमिकावभृथ एव विहि
तमस्ति। तत्प्रतिषेधश्चेद्वरुणप्रघासे यदि सौमिकादवभृथाद्वारुणप्रघासिकावभृथे धर्मा भवेयुः। तं का
रा वचनप्रवृत्तिस्यामित्यस्य हेतोरनुकर्षणार्थः। उच्यते। ऽग्निर्धीयते नेशोहे नेति वचनं नामधेयमुच्यते। अ
वभृथपदस्यैवं रूपे। तेनावभृथ इति नामसामान्यात्सौमिकावभृथधर्मप्रवृत्तिर्भवति। धर्मप्रवृत्तिरपि
साम प्रतिषेधात्तत्प्रतीयते। तस्य प्राप्तिपूर्वकत्वात्। तेनोहहातिवाचनादि सर्वं तद्धोमं भवति प्रतिषिद्धवर्जं। ए

वं कुंडपायिनामयने मासमग्निहोत्रं जुहूति दर्शपूर्णमासाभ्यां मासं वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यादौ
सर्वत्र नामधेयाद्धर्मप्राप्तिरेष्या॥ ॥ ऋणावत्सशौन मंत्रोपदेशात्। तथा एवास्फ कारोशोरिति वचनेन पत्नीकर्णो
पासनवल्कपाल्लेनाधमेधः कृष्णाजिने हविरुपासनमान्त्रोवा निषेधति। पत्नीकर्णा बद्धुधिरुपासनं न भवति। क
स्मात् मंत्रोपदेशात्। यदि वत्तथो एवास्फगिसनेन सर्वस्याः कर्णापासनेवकन्येष्यतायाः प्राप्तिः स्यात्। तदार
न्रसां भागोसीति पुनर्मंत्रोपदेशो न स्यात्। मंत्रस्याधिमानत्वात्। अस्ति तु पुनर्मंत्रोपदेशः। तथा एवास्फकु पत्नो
र न्रसां भागोसीति। तस्माद्बुधिरुपासनमात्रमेव भवति॥ ॥ विरूपे लौकिकमभ्युत्कत्वात्। यत्र कर्मणि वैश
यः संशयो भवति किमत्र लौकिकं वस्तु ग्राह्यमुत वैदिकमिति। तद्यथा। उभयाभावे उल्मुकी हिरण्यं वोपयु
परिधारयन्तीति। तथा गार्गत्रिरात्रे आज्यदोहे शुष्मामस्वग्निमुपनिधाय स्तुवत इति। तत्र उल्मुकादेः किं लौ
किकाग्निर्ग्राह्यः। उत वैदिको गार्हपत्यादिरिति। विरूपे। एवंविधे संदेहे सति लौकिकमेवाग्निं गृह्णीयान्न
वैदिकगार्हपत्यादिकं। कुतः। अभ्युत्कत्वात्। लौकिकस्याग्नेः कुत्रापि वाक्येनाविनियुक्तत्वात्। इतरस्य गा
र्हपत्यादेर्वैधेनैव कार्यान्तरे विनियुक्तत्वात्। गार्हपत्ये हवींषि श्रपयति आहवनीये जुहोति। दक्षिणाग्ना
वन्वाहार्यं पचतीति। तस्मादेवाभ्युत्कत्वादन्यथा पितृणार्थे इत्यनेनेवातिदेशेनारंभणीयमिदं विरूपे लौकि

१९ कामिति सूत्रं। लोत्रवेलायां तं प्रज्वलयेयुः। तमनुमंत्रयेताग्निराबीति। अतआत्मरोहसामाग्निरत्रानुदाहरणं। अमरे
वोदाहरणं प्रदर्शनीयं। सतस्ते। तद्विप्रकरणावगतसर्वार्थत्वस्य द्रव्यस्य प्रकरणाविहितातिरिक्तकार्ये साधनत्वानि
करणाय वा। इदं तु गार्हपत्यादीनां सामर्थ्यात्सर्वार्थत्वे प्राप्ते वाक्यबोधितहविःश्रपणादिकार्यातिरिक्तकार्येषु तेषां सा
धनतानिराकरणार्थमित्यर्थः। त्रिषु सोमगर्गे त्रिणवे आत्मरोहणि सामानि सन्ति। आत्मरोहणामग्निमुपनिधाय
स्तुवत इति। तत्र छंदोगसूत्रे विशेषः। आत्मरोहणामात्मरोहणानामग्निमुपनिधाय स्तुवत इति होतुर्धिष्ण्येग्निं धारये
युः। प्रथमेहनि मध्यंदिने आनयेयुः। माध्यंदिने धिष्ण्येष्वग्निविहरणकाले यमानयेयुस्तं धारयेयुर्यावदात्म
रोहकाल इति। तत्रधाभीव आत्मरोहं। तथा प्रातःसवन उक्थ्योः। उत्तरयोर्द्वितीयतृतीययोरह्नोः प्रातःसवने धिष्ण्ये
ग्निविहरणीयं होतुर्धिष्ण्ये आनयेयुस्तं धारयेयुर्यावदात्मरोहकाल इति। तयोर्हि माध्यंदिने आत्मरोहः। इष्टिषु पशौ
च दर्शपूर्णमासधर्मा भवंतीत्युक्तं। दर्शपूर्णमासयोश्चाग्नेयादयः षट्प्रधानयागाः। तत्रायं संदेहः। किं यत्र तु
त्र चिद्विकृते यागे नियमेन यतः तु तद्विराग्नेयादेर्धर्मा भवंति उताग्निमन्त्रसमारेवेति नियम इति। तत्र नियम
कारणाभावादनियमेनात्र आह।।।। विधिविशेषः कर्मणि कद्विशब्दपरिमाणाद्गपरेवतागुणासामान्येभ्यः। कर्म
णि विकृतेऽप्रधानकर्मणि एकद्विशब्दपरिमाणाद्गपरेवतागुणासामान्येभ्यः कारणेभ्यो विधिविशेषो भव एम
१९

ति। अश्वस्मार्द्वयश्राहृ.ताग्न्याधानमागारस्मिंल्लेहृतेप धानकर्मेति धर्मो भवेन्नीत्येवं वि धये विधि त्रिविधो भवतीत्यर्थः। विधेरि
तिकर्त्तव्यताविधेर्विशेषो विधिविशेषः। सामान्यशास्त्रः प्रत्येक. मप्रतिसंबध्यते। एकद्वीतिभावप्रधानो निर्देशः। तत्र श्रोए कु
त्वसामान्यात्तु शास्त्रपरि माणसामान्यमात्र द्रव्यसामान्यात्। रेवतीसामान्यमात्रगुणसामान्यमात्रेति हेतुविभागः। यथा संभवमे
तेभ्यो हेतुविशेषेणो धर्मप्राप्तिर्भवति। यथावेहृते एक. देवत्ये सोमसामान्यत यो मवाहणा हो यागे मध्व. देवत्ये नांवान रसा
मान्येन प्राकृताद्‌ाग्नेययागाद्धर्मो भवंति। तेनस्ववो ध्वकदेवत्येषु चतुर्थ्यकरणा याग्नेयधर्मो भवंति। यद्यपि प्राकृते नोरनानु अव
धर्म्य कतादिसामान्यं अग्नीषोमीयादि स्वेच्छत्ति तथाप्याग्नेय एकदेवत्यत्वमन्तरसामान्यमधिकं। तेनैवं नियमः आग्ने
यादेवेति नाग्नीषोमीयादेरिति। सदृशं हि हृष्ट्वा सदृशोपतीति र्भवति न तस्त्रा साद्रूप्यात्तद्धर्मत्वमनुमीयते। तद्यथा एक
स्मिन्नश्वान उप्रहिष्यादौ श्री घ्रगतित्वादि गुणायुक्तेम् अध्यं मज्ञाते मया पश्चात्तत्सदृशमेवाप्याधिकं द्रष्टेन ज्ञातस
वर्वं हष्ठाश्वादिसदृशगुणत्वं कल्प्यते साद्रूप्यात्। तथात्रापीत्यर्थः। यथा वा। इति कर्त्तव्यताके व्रीहितंडुलोदनेपाके
ज्ञाते श्यामाकगवेधुकतंडुलौघोदनपाके अनुपदिष्टे तिकर्त्तव्यताके पि दनपाकसामान्या व्रीहितंडुलौदनपाके ति
कर्त्तव्यता यथा कल्प्यते तद्वत्त्रापीत्यर्थः। तथा। हि देवत्यत्वसामान्यादाग्नावैष्णवे ग्नीषोमीयस्य धर्मो भवंति।
ननु द्विदेवत्यत्वसामान्यमैन्द्राग्ने पि विद्यते। तत्रचापि यमो भविष्यत्यग्नीषोमीयादैन्द्राग्नादेति। मैवं। ग्राहपरि

२० मणात्सामान्यमधिकमग्नीषोमीयेऽसंपातात् । शास्त्रपरिमाणात्सामान्यं चतुर्भ्यसंख्यातत्वात् । अत आग्नेयेऽधिकमग्नीषोमीय
योरुभयोरपि पंचात्तरत्वात् तश्चवानरसामान्यात् अग्नीषोमीयादैंद्राग्नावेस्मेव धर्मा भवंति । नैंद्राग्नादिति । अग्नेने
वशाहृपतीसामान्यसामान्येनमाहृते ऐंद्राग्नस्य धर्मो भवति उभयोरपि द्व्यस्तरत्वात् । नाग्नीषोमीयात् । तथा । द्रव्यसामा
न्यादपि तत्सदृशे वैकृते हव्यांतरे धर्मप्रवृत्तिर्भवति । यथा औषधत्वसामान्यात् पुरोडाशधर्माश्चरुधानामंथादिषु भ
वंति । सान्नाय्यात्सान्नाय्यपयस्यादिषु । द्रवत्वसामान्यात् आज्यधर्मो मधूदकादिषु । छागधर्मो मेषादिषु । देवता
सामान्यादपि धर्मो भवति यथाग्नेये आग्नेयस्य ऐंद्रे ऐंद्राग्ने ऐंद्राग्नस्येति । न चैतत्पुनरुक्तं । देवतैकत्वादिनापि सिद्धत्वात् । ए
कद्रव्यदेवताविशेषे द्रव्यस्य समवायादिति वक्ष्यति । तत्र देवतासामान्यादित्युच्यते । प्रमथाद्विष्यदेवताविशेषस्ते
तस्य वक्तुमशक्यत्वात् । गुणसामान्यादपि वैकृते प्रधाने धर्मप्रवृत्तिर्भवति । यथा प्राकृतादुपांशुयाजाद्वैकृते तेषा
विवस्तोपेतादुपांशुयाजे । तेन प्रणवोपयजामहोवषट्काराः संप्रैषाः प्रैषाश्लेत्वेहृपांशुहविःषु देवतानामधेयंबो
यांच्चित्यास्वोधर्मास्तेषु भवंति । यथा वा वैश्वानरस्य यागस्ते वोस्यं मास्सा त्रिःप्रमाणो योऽस्यं माश्लाग्नेय धर्मो उदित आर
भारवो भवंति । अमावास्यापांक्तिप्रमाणो वामावास्याग्नेय धर्मो अनुदितारंभस्यो भवंति । कालो यत्र गुणाइ
ति । कालस्यापि कर्मार्थत्वेन परार्थत्वादंगत्वं भवतीत्युक्तं जैमिनिना । शेषः परार्थत्वादिति । अथ यथाद्दहतु एम
२०

दाहरणं। द्वादशकपाले वैश्वदेवे अग्नेकरेष तत्त्वसामान्येनाग्नीषोमीयधर्मा ऐंद्राग्नधर्मो वा। नियमेन प्राप्नुवंति। तत्र द्वा
दशकपालत्वरूपगुणसामान्यादैंद्राग्नस्यैव नाग्नीषोमीयस्येति। द्रव्यपरिमाणसामान्यं त्वत्रैकस्यापि नास्ति। अथ द्र
व्यदेवताविरोधे चिंत्यते। पशावातिथ्यायां वैश्वदेवो नवकपालः पुरोडाशो विहितोस्ति। तत्र द्रव्यसामान्यात्सौम्येडाम्निका
धर्माः प्राप्नुवंति। देवतासामान्यात्तु वैश्वदेवोपांशुयाजस्य धर्मा इति। यथा वा अग्निहोत्रं सोमेप पयसी अग्निहोत्रेयाति
स्यत्राग्नेये पयसि द्रव्यसामान्यात् सांनाय्यस्य धर्माः देवतासामान्यात्तु पुरोडाशस्येति। यथा राजसूये पंचबिले। ऐन्द्र ऐ
कादशकपालः पुरोडाशो भवति। तत्र द्रव्यसामान्यात्सौमेडाशिका धर्माः। देवतासामान्यात्तु सांनाय्यस्येति। एवं
द्रव्यदेवताविरोधे नियमकारिकारणाभावाद्द्रव्यसामान्याद्देवतासामान्याद्वानियमे प्राप्ते आह ॥ ॥ नियमो द्रव्य
देवताविरोधे द्रव्यस्य समवायात्। द्रव्यदेवताविरोधे द्रव्यस्यैव द्रव्यसामान्यमेव बलीय इति। कस्मात्। समवायात्। द्र
व्यस्य यागे समवायात्। द्रव्यं हि स्वरूपेण स समानं यागं निष्पादयति। देवता तूद्देशमात्रेणाग्न्यपदेशाद्य सूरमभ्यो
आरात् तत्रोपकरोति न द्रव्यवत् स्वरूपेण। तेन यागस्य द्रव्यं संनिकृष्टं देवता तु विप्रकृष्टा। संनिकृष्टविप्रकृष्टयो
मध्ये संनिकृष्टमेव बलवदिति न्यायेन द्रव्यमेव बलवदिति तस्मात्तेनैव धर्मग्रहणं न देवतासामान्येन। अथवा वै
श्वदेवे द्रव्यस्य स्वरूपे विशेष्यत्वेन समवायो देवतायास्तु विशेषणत्वेन। विशेषणविशेष्ययोर्मध्ये विशेष्यमेव वली

२१ परतिमाषोऽस्य सबलवत्त्वे। तेनवैश्वदेवेनवकपालेपुरोडाशधर्मा एव भवंति नोपांशुयाजस्य। एवमाग्नेयेपि प्रमतिक्षान्नाशस्येवारं
द्वेपुरोडाशेपुरोडाशस्येव। यदस्मान्त्रापालाभइत्यत्रापिइष्टसामामेनपुरोडाशस्येव। नद्देवतासामामामाश्यानापत्ता
वासात्राप्यसेत्याहितेपां॥ ॥दाहापयोऽस्य मते। मैत्रावरुणीपयस्येति। तथ्या वातुमोऽस्मेषु। वैश्वदेवीपयस्येति पय
स्येवारुणीमाहतीचेति। साच पयस्या दधिपयोभ्यां निष्पाद्यते। तदुभयनिष्पाद्यत्वात् संदेहः किमस्यां पयस्यायां द
धिपयसोरुभयोर्धर्मा भवंति। उत दध्नः। अत्र पयस्यापयस एवेति तत्राघंपत्तमुन्नावयति॥ ॥आमिक्षायामुभयोस्तत्त्वि
वृत्ते॥॥ ॥आमिक्षा पयस्येति ज्ञानयोतरं। आमिक्षायां पयस्यायामुभयोर्दधिपयसोर्धर्मा भवंति। कुतः तत्त्विह
तेः। यतः ताभ्यामेव दधिपयोभ्यां कारणभूताभ्यामामिक्षा निर्वर्त्यते। निष्पाद्यते। इमं पक्षं दूषयति॥ ॥नैकचोद
नात। पदुक्तं आमिक्षायामुभयोर्धर्मा भवंतीति तन्न। कुतः एकचोदनात। पतदमयं एकचोदना॥ मैत्रावरुणपामि
क्षेति। एकं हि पयस्याद्रव्यं विधीयते॥ मैत्रावरुणीपयस्या वैश्वदेवी वारुणीमाहतीत्येक वचनश्रवणात। एक
स्योभयधर्मत्वे नसंभवति विरोधमत। दधिधर्मत्वेहि अपरिवासितस्याशाखेयावज्ञापाकरणमाप्नोति। पयोध
र्मत्वेच परिवासितया तथापि पयोधर्मत्वे चरोहनेच तुषोपस्माहरणं पयो हरणं च प्राप्नोति। तस्यापि धर्मत्वे। अतउभ एम
यधर्मत्वेविरोधाद्दध्न एव धर्मत्वमेवयुज्यते। अत्र पयस्येति पयसमुपमावयम्॥ ॥दधः हेयातात। आमिक्षायां दध्ने २१

धर्मो भवंतीति तु तः संघातात्। संघातः काठिन्ये। कठिनलक्षणामामामारिक्षसर्प्यः। दधिकठिनं। आमिक्षा आपि कठिनेति।
अथ सिद्धांतमाह॥ पयस्सम्भवात्। आमिक्षायां पयस एव धर्मो भवंति न दध्नः। कुतः सम्भवात्। पयसो ह्या
मिक्षा भवति। ननु दध्नोपि भवति पूर्वं स्वकृतं आमिक्षायामनुभवोस्तन्निवृत्तेरिति। तन्न। घनत्वं संपादयन्नपि वदधिनि
नयनं क्रियते। पयस्यानुपयस एव भवति। अथवा तप्ताकनूतनदृक्सस्य पयसो रसस्य मधुरस्यामिक्षायां भावात्। प
यो हि मधुरं। आमिक्षापि मधुरेति। अतः पयस एव धर्मा आमिक्षायां भवंतीति सिद्धं। न तत्र परिवासितया शाख
या पवित्रबंधनानंतरं वत्सापाकरणं। दोहनं च तुष्टपयसा सारंनमोरूणां च आम्यनिर्वापानंतरं दोहनं शप्णाम
भिघारणा चेत्यादयः पयो धर्माः पयस्यायां संभवंति। अथाग्नीषोमीयपशौ देवतासामान्यात् कृताग्नीषोमी
यपुरोडाशधर्मस्याबाह॥ पशोः सान्नाय्यस्य तु उक्तं। पशोः अग्नीषोमीयस्य पशोः सान्नाय्यस्य धर्मा भवं
ति। अग्नाकृताग्नीषोमीयपुरोडाशस्य। न तु उक्तं। तत्र प्रागेवोक्तं द्रव्यदेवताविधेः द्रव्यस्य समवायादिति। ननु च
कथं द्रव्यदेवतयोर्विरोधः। इह हि पशुद्रव्यं विधीयते न च पयः कृतो नास्ति। अतस्तत्कस्य धर्मानुपस्थापयती
ति। उच्यते। पशुत्वावतस्थो हृत्स्यघते। पयोपि पयसो हृत्स्यघते। अतः पशुद्रव्ये प्रतीते सान्नाय्यं बुद्धावागच्छति।
उत्कर्षादृश्यात्। अतः पशुद्रव्ये सान्नाय्यधर्माणामप्राप्तके। अग्नीषोमदेवतानु अग्नीषोमीयपुरोडाशस्य।

२२ अतः कारणाद्यमपि द्रव्यदेवताविरोध एव भवति । अतः साधूक्तं तदुक्तमिति । ननु तर्हि तेनैव सिद्धत्वात् । पुनरुक्तमि
दं ॥ मैवं । तत्र हि वैमृधादौ सामान्यात् कृतमेव पुरोडाशादिद्रव्यधर्मोतां प्रापकं । इह हि प्राकृतसान्नाय्यद्रव्यस्य सद्भावोप
युक्त्यमिति अवेक्षमाणस्य पुनः सूत्रारंभः ॥ ॥ प्रायश्चित्तश्रुतेश्च । प्रायश्चित्तश्रुतेरप्येवं ज्ञायते यत्सान्नाय्यधर्माः पयो
भवंतीति । कथं । पशुरवावेत्र वेसाप्यो रवा वानामभिमंत्रयेतेति प्रायश्चित्तश्रुतिः । अस्यां हि श्रुतौ पयणदुरवाद
श्यते । सावत्तैरेव उपचप घ्नते पदरा पृश्रो सान्नाय्यधर्मो भवंति । नान्यथा । तत्रचन पाश्रुत्या विपरीता बुद्धिरुदेति । प
यसो सान्नाय्यधर्मा न भवंतीत्येवंविधस्य । कथं । यदि पयो सान्नाय्यधर्मा भवेयुः तदा सान्नाय्यापायाः स्रवणे
परिमंत्रणं तस्य पयसो स्रवणादवपश्रवा यो अपि स्रवणे प्राप्नोत्येव । किमर्थं पुनरुच्यते पशुरवावेत्र
वेदिति । उक्तं च । तेनैवं ज्ञापते सान्नाय्यधर्माः पयसो न भवंतीति । उच्यते । सान्नाय्योत्पावां हि प्रधानद्रव्यस्य सान्नाय्य
स्य संस्कृतिः । पयसो गुणभूताया वत्सापाः । अतः प्रधानद्रव्यस्रवणे पयसः प्रायश्चित्तं विहितमंगभूतस्य सान्नाय्यस्रवणे न
प्राप्नोतीति । तदर्थमुच्यते पशुरवावेत्र वेदिति । तेनात्र प्रायश्चित्तश्रुतौ पयसो गुणवाद्यादर्शनात् सान्नाय्यधर्मो भवंतीति
सिद्धं ॥ ॥ पयसो सान्नाय्यधर्मो भवंतीत्युक्तं । सान्नाय्यं हि द्विविधं । दधि च पयश्च । तत्र संघातसामान्यात् यत्रोर्द्धमध
मेषामाह ॥ ॥ पयसः कालानंतर्ये धर्मानुग्रहे स्यात् ॥ पयसो पयसश्च एव धर्मा भवंति न दध्नः । कस्मात् । कालात् । राम
२२

आनंतर्यात् । धर्मानुग्रहाच्च । कालादिति कालसामान्यात् । समानकालत्वाद्धि यज्ञोः पपक्षस्याप्यूपनीतः । तस्माद्घदामोवारि
तो धत्ते यः पयोधत्त इति । अत्र गर्भधारणं पयोधारणं चैककालमुच्यते । तथाप्येहा पशुर्जायते यत्पयो जायत इति । अथवा
पशुः स्वघस्कालोपरस्व्धेसारिवाकात् । पयोपि तद्घस्काले । न ह्यपि वद्धेह निष्पाद्यं । तथानंतर्यात् । पशुरपि जातो द्जादि
वी पशोः साक्षादुत्पद्यते पयश्चारभ्यतु पयस उत्पद्यते नस्मादानं पशोः । अतः पशोः पयोनंतरं दृष्यितु पयसा क्षेव
हितं । तेनानंतर्यात्पशोः पयसो विधेयत एव भवति । किंच । धर्मानुग्रहाच्च । पयोधर्मत्वे सति पशुपाशाणा वपाश्रपणी
स्तो वा नामासादनं यो हेतु तारीनां माकृतमां धर्माणामनुग्रहः हेतो भवति । न ह्यपि धर्मेष्वे । अतोपि कारणात्
शो पयो धर्मा एव भवंति । तत्र यथा पाश्रपणीस्रुचो वा नामासादने यो हेतो । यो मूलः पृथिवी स्थहद्मूहि तेन मंत्रे
ण वपाश्रपयस्योदाहाने । विति धारस्थ लोपाद्वापि अधिश्रयणाभावः । असारत्वेप जन्मानेव पायोस्मिन्ने । वपाश्रपतयोः स्थि
तामा एव वपापायावे घामासादने । मूलस्यापि घोरसीत्यादाने । विरोधात्त्राधिश्रयणाभावः । असारत्वे हृदयमत
ईनं । उखापास्त्र पिमेचेणालनाधिश्रयतो । असारक्षपांमांसप्रत्येपश्चा इत्सेव मारुपः पयो धर्मा भवंति ॥ ॥ द
र्शपूर्णमासधर्मा इष्टिपशुषु विस्पतेनानुमानिकवचनेन प्राकृते परार्थे मात्रे विकृतौ भवतीत्युक्तं ॥ तत्र पङ्
तौ पाघ्यहकालनाकर्मणा उक्तापापि विकृतौ प्राप्नोत्यत आह ॥ ॥ सप्तदशस्वकाशकृत्विः । कासाकृत्स्निरायापि

विकृतीनां च यस्संस्थासंघः कालस्तं ब्रवीति। कस्मात्तदापद्धा पशुना यद्यपाणोनक्षोमेन यक्ष्यमाणः स पौर्णमास्याममावा यजेतेति वचनात् ॥ ॥ अनुवादः पूर्वस्येति वाक्यस्य बाहरी अथवाक्यबाहरी। तावेवमाहतुः। पदच्छेदमनेन वाक्येन पौर्णमास्यामावास्याभ्यां वा विकृतीनामनुष्ठानमुच्यते। तच्च प्रकृतितः प्राप्तमेव। अतः कारणाद्द्वयोरप्यनुवाद एव पूर्वस्य प्रकृतितः प्राप्तस्य कालस्य। नापूर्वविधिरिति ॥ ॥ स्थितं तावदस्तिविहंतित तमेतदधिकरणं। अत एवमत्र मच्छिंमते ॥ ॥ स्थानापत्तेष्वेषु धर्मलाभो विप्रतिषिद्धः। इदं श्रूयते। सोमेंद्रं चरुं निर्वपेच्छिपेश्रीकाम इति। तथाऽथबार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपतीति। अथ पहृद्वायपशुपत्नमोरोहिंगावेधुकं चरुं निर्वपतीत्यादि। तत्रेदं संदिह्यते। किं मुद्गादिषु प्राकृतद्रव्यस्थानापन्नेषु प्राकृतव्रीह्यादिद्रव्यधर्मा भवंति उत न भवंतीति। तदर्थं वेदं विसते। किं प्राकृतो धर्मो गणां व्रीहिस्वरूपं प्रयोजनं मपूर्वसाधनत्वं वा। किंचातः। यदि स्वरूपं प्रयोजकं तदा स्वहं चिंस्यते। किं प्राकृतो धर्मो गणां व्रीहिस्वरूपं प्रयोजनं। मपूर्वसाधनत्वं वा। किंचातः। यदि स्वरूपं प्रयोजकं तदा स्वरूपस्य विकृतौ मुद्गादिष्वभावान्न तद्धर्मप्राप्तिः। अपूर्वसाधनत्वस्य धर्मप्रयोजकत्वे तस्य मुद्गादिष्वपि भावात्तेषु मुद्गानां धर्माणामपि प्राप्तिर्भवतीति। तत्र व्रीहीन्वहंति व्रीहीन्प्रोक्षतीति व्रीहिसंयोगेन धर्माणामश्र एम वणात् मुद्गादिषु न भवंतीति प्राप्ते आह द्रव्येषु वैकृतेषु मुद्गादिद्रव्येषु प्राकृतद्रव्यधर्मलाभो भवति तत्र मा

कृतद्रव्यधर्मा आघातादिनग्रहणामोक्षणामंडनाद्यो भवंतीत्यर्थः। कुतः स्थानापत्तेः कार्यापत्तेः। वैकृतस्य द्रव्यस्य प्राकृ
तद्रव्यकार्यापन्नत्वात्। यतः प्रकृतौ व्रीहीणां अपूर्वसाधनत्वं धर्माणां प्रयोजकं न व्रीहिस्वरूपं व्रीहिस्वरूपस्य प्र
योजकत्वे धर्माणामानर्थक्यापत्तेः। विनापि संस्कारं व्रीहित्वस्य सिद्धत्वात्। अतो व्रीहीन्प्रोक्षतीत्यादौ अपूर्व
साधनं प्रोक्षतीत्यर्थः। अपूर्वसाधनत्वं च वैकृतेष्वपि मुद्गादिष्वस्तीति भवत्येव प्राकृतद्रव्यधर्मलाभः। कीदृशाः
अप्रतिषिद्धाः। यः प्राकृतद्रव्यधर्मो वैकृतद्रव्यधर्मेण न विप्रतिषिध्यते। यस्तु विप्रतिषिध्यते स न भवति।
यथा पादिधेनौ पशुनियोजनविषमत्रपादिधेनूपकार्यापन्नस्य पुरुषधर्मा मोत्छ्रपणं न भवति। यदि धनेनवि
प्रतिषेधात्। एवं वैकृते द्रव्ये प्राकृतद्रव्यकार्यापन्ने प्राकृतद्रव्यधर्माः सर्वे भवंतीत्युक्तं। तेन प्राकृतद्रव्यसंबंधि
मंत्रैरर्पितस्याभिधानं प्राप्तं तत्रापि संदेह॥ किमूहितेनाभिधानं उतानूहितेन यथाश्रुतेनेति। विशेषानुपदे
शाद्यथाश्रुतेनानूहितेनाभिधाने प्राप्ते आह॥ ॥यथार्थमूहश्चोदिते॥ चोदिते विहिते वैकृते द्रव्ये यथार्थ
मूहो विपरिणामः कर्तव्यः। यो यो वैकृतोर्थो यथार्थं यस्यां विकृतौ यः प्राकृतद्रव्यस्थानापन्नो वैकृतोर्थः। तस्मा
तदर्थाविपरिणामो कार्यः। यथा प्रकृतौ अग्नीषोमीयस्य छागस्य वपायै मेदस इति छागस्य यागसाधनस्य तस्याभि
धानं कृतं। विकृतौ च सारस्वतो मेष ऐंद्रस्य भद्रस्यादो मेषर्षभयोर्यागसाधनत्वेन विधानात् छागस्येव स्था

नेमेषस्य ऋषभस्येति वैकृते तस्यार्थस्याभिधानं कर्तव्यं । एवं अग्नीषोमाभ्यामित्यस्य परस्य स्थानेपि सारस्वमैंद्रायेति वैकृ
तस्यार्थस्याभिधानं कर्तव्यं । एवं प्रकृतौ छागस्यैकत्वाच्छागस्येत्येकवचनं । विकृतौ तु छागद्वित्वानेकत्वे छागयोश्छा
गानामित्यूहः । वपानेकत्वे वपाभ्यां वपाभ्य इत्येवमपि यथार्थमूहः कार्यः । यतः प्रकृतौ मंत्रेण प्राकृतद्रव्यदेवता
देरभिधानं कृतं । विकृतावपि प्रकृतिवन्मंत्रावाप्तेन वैकृतद्रव्यदेवतादेरभिधानं कर्तव्यं । अन्यथा हि तन्त्रवत्तत्वं तुं मंत्राणां
तीर्थाद्दृश्यते । योरि न इति विशेषोपादानान्मुख्यमात्ररूपेणागृहीतेमन्त्रनिधिमन्तेमेषादावूहो न भवति । तथायो
नंशाद्दे अविप्रतिपत्तिरिति । एवं सर्वत्रोहे प्राप्ते क्वचिदपवादमाह ॥ ॥ न प्रकृतावपूर्वत्वात् । प्रकृतौ पत्नीं संनह्य
पत्निवाज्यं विसृजस्व पत्निवा यं पछ नेष्टः पत्नीमुदानयेत्येकवचनं एकप्रयोगे उपपन्नार्थं । अनेकपत्नीकप्रयो
गेतु हितद्यं नवेतिसंदेहे निसीयते । प्रकृतावूहो न भवति । कस्मात् । अपूर्वत्वात्प्रकृतेः । यतः प्रकृतेरन्या प्रकृति
र्नास्ति । यद्धि क्रियेत । अनेकपत्नीकेपि पत्नीमित्येकवचनांतमेव प्रयुज्यते नोहितं । एवं पवित्रेस्थ इत्यत्रापि व
हित्वेत्र यपह्ने नोहितव्यं । प्रकृतिवद्विकृतिः कर्तव्येत्यनेन प्रकृतितः सर्वे धर्मा विकृतौ प्राप्नुवंति । तत्र केषांचिद्ध
र्माणां बाधमाह ॥ ॥ विकृतौ वचनार्थलोपविरोधे लोपप्रवृत्तिः । विकृतौ प्राकृतधर्माणां वचनादप्रवृत्तिर्भवति । एम
प्रयाणिन्नयत्रे प्रस्तरं गृह्णाति नांतर्दधाति विधृती । अग्नावग्नाव्य न होतारं प्रवृणीते । नाध्वर्युः प्रस्तरं समुद्धेत्तु पत्नी

निर्णीय
त

न

ति। यथा गृहमेधीयेन प्राशित्रमिति। तथाऽर्थलोपादपि विकृतौ प्राकृतधर्माणामप्रवृत्तिर्भवति। यथा मुंजेषु कंड
नस्य। यथा चरौ मथनाद्भिरभिमर्शेन संपवनादेः। यथा सान्नाय्येष्टौ कृष्णाजिनोलूखलमुसलासारणादेः। तथा वि
रोधस्यापि प्राकृतधर्माणां विकृतावप्रवृत्तिर्भवति। तद्यथा। चरौ पेषणमभिवासनं च। परिधौ पशुनियोजनमित्य
त्र यूपस्थानापन्नस्य परिधेस्तक्षणाचारध्रूयसर्जनीनामपि धिष्ण्यपणां च॥॥ पदार्थोत्पत्तेरभावेऽभावः॥ पदार्थम
स्यार्थमुत्पत्तिर्यस्यासौ पदार्थोत्पत्तिः तस्य पदार्थोत्पत्तेस्तद्भावे तस्य परस्याभावे तस्य पदार्थोत्पत्तेरप्यभावो भवति।
यथा प्रकृतौ तंडुलनिष्पत्तिनिमित्ताकणानामनुत्पत्तिः पदार्थो तंडुलार्थो। अतः पदार्थोत्पत्तेः कारणादेः तस्य परस्य तंडुला
देरभावे यथा यस्यादौ तस्यापि करणादेरभावो भवति तदभावात्तु तदर्थस्याघातहनस्याप्यभावः। यथा च विष्णोपांश्वंगु
लिप्रक्षालनस्य तदर्थनियमनस्य च। एवं सर्वत्र प्राप्तौ क्वचिद्विशेषमाह॥॥ चोदितत्वाद्यभावः। यत्र पदार्थोत्पत्त्यत्र द्र
व्यं क्वचित्कार्ये तत्साधनत्वेन चोदितं भवति। तत्र परस्याभावेऽपि पदार्थोत्पत्तस्तद्द्रव्यस्याभावो भवति। तद्यथा दशपत्रा
केणेन शुक्रं संमार्ष्टीति श्येनहृयमाणोऽतस्य त्रेशाकलं तस्य ग्रहस्य मार्गसाधनत्वेन विहितत्वात् तदपाभावेऽपि शाकल
मात्रग्रहस्य तेसंमार्गोऽस्ति तदर्थं। यतोऽत्र शाकलादिद्रव्यं क्रियार्थं। तेन क्रियाप्रधानभूतात् तदंगभूतं त्रशाकलमात्रे
स्ति द्रव्यार्थमाक्षिपति। यत्र तु क्रिया द्रव्यार्था। तत्र द्रव्यस्य प्रधानभूतस्याभावे तदंगभूतायाः क्रियायाप्यभा

अभावे अंगभूतायाः

व एवानुज्ञायते। स्थिता उत्तरमुच्यते। तत्रैवं पूर्वपक्षः कृतोस्ति॥ पौर्णमास्यां पौर्णमास्यया यजेतामावास्यायाममावास्यया य
जेतेत्यादिना प्रकृति विहितस्य प्रतिपन्नलक्षणस्य प्रयोगकालस्य विकृतावपि प्राप्तत्वाद् इष्ट्येतिवाक्ये अमावास्यायां पौ
र्णमास्यामित्यनुवाद एव नापूर्वकालविधिरिति। तत्र सिद्धांतमाह॥ ॥न विपक्षेत्रिपास्फः समभिव्याहारात्। विप
क्षत्वाहे न प्रतिपद्युष्यते। विपक्षेप्रतिपरिवेकृतसः क्रियानस्फः॥ किं तर्हि पौर्णमास्यामावास्यामेव स्फुः कमात्।
समभिव्याहारात्। समभिव्याहारे यावां तस्मात् तापद्रष्येमादिवाक्यानां। ननु माभूत् तस्यैव कालस्यायमनुवाद इत्युक्तं।
नानुवादः। अनुवादे हि वाक्यस्यानर्थ्यमेव स्यात्प्रवृत्तिविशेषकरत्वाभावात्। पौर्णमावास्याशब्दयोर्लक्षणा
प्रसंगात्। अनुवादे हि पौर्णमास्यमावास्याशब्देन गौणापाश्रसाप्रतिपन्नत्वात्। तथा च श्रुतार्थपरित्यागो भवति। न चे
तदुपपन्नं। पद्वलक्षणानुरोधेन श्रुतिर्बाध्यते॥ किंच॥ सामर्थ्यादनेव कालविधानं। नहि वाक्यांतरेण तस्य कालो विहि
तोस्ति यस्यायमनुवाद इत्युच्यते। अतोपि नानुवादः। परश्चे सत्रवाक्ये इष्टिग्रहणतो नैवाग्रयणग्रहणतो सिद्धेऽति
ष्टिरूपस्याप्याग्रयणस्य पौर्णमास्यमावास्यालक्षणकालविधानायतस्य गाग्रयणग्रहणं। तेन दर्शपूर्णमासमी
जानो रक्तिराग्निपर्व यानुष्ठानुपग्रालत्ता नौतपेहिमासाव निष्टिरूपेष्याग्रयणोऽयंकालः सिद्धो भवति॥ ॥अथयदा
क्षायणायतत्तुपनिबध्नाति॥ ॥दाक्षायणयज्ञेतः प्रजापश्वन्नपशुकामस्य। दाक्षायणा इति च समानस्य कर्मणो

नामधेयं——दाक्षायणयज्ञो नामेति श्रुतेः। सवमनाकामस्य पशुकामस्यान्नकामस्य यशस्कामस्य च यजमानस्य
भवति। अत्र धर्मग्राहकैकफलसिद्धिः। अथ य सर्वदाऽग्नीषोमीयेण यजते पौर्णमासाभिमारिवाकेषु सदेवतानि दर्श
पूर्णमासिकान्येव हवींषि प्रत्यभिज्ञायंते। केवलं तु अग्नीषोमीयैंद्राग्नसांनाय्यानां तिथिक्रमभेदेन विकारः। तथा
च संदेहः। किं दार्शपौर्णमासिका एवैते यागा गुणमात्रविकृता उत यागांतराण्येतानि तुल्यद्रव्यदेवताकानि वि
धीयंत इति। तत्र सत्रेतो व श्वेपद्मपति॥ ॥नामफलगुणयोगात्कर्मांतरं। अयं दाक्षायणयज्ञो दर्शपूर्णमासाभ्यां
भिन्नं कर्मांतरं। न दर्शपूर्णमासौ। कुतः। नामफलगुणयोगात्। नामोमसात्। यतो दाक्षायणयज्ञ इति भिन्नना
म। तद्भेदाच्च भेदो दृष्टो यथा वैश्वादृम्मो मैत्र इति। तथा फलभेदात्। दाक्षायणस्य हि प्रजादि फलं श्रूयते। फलाभा
वे च फलितोन्यत्वं भवति। गुणाभ्यासाच्च। गुणान्यत्वं च दृश्यते। मैत्रावरुणपामिक्षा अथ वाजिभ्यो वाजिनं जुहोतीत्या
दि। अतः कर्मांतरमिदमिति प्राप्ते आह॥ ॥गुणाविधानवासंनिधिसंपद्यमाभ्यां। वाशब्दः पक्षव्यावृत्तौ। नेदं द
र्शपूर्णमासतो न कर्मांतरं। किं तर्हि गुणविकृतौ दर्शपूर्णमासावेवैताविति। कस्मात्। संनिधेः। दर्शपूर्णमास
संनिधावेव दाक्षायणस्य पाठात्। आवृत्तिं वा एते धावंति ये दर्शपूर्णमासाभ्यां यजंत इति दर्शपूर्णमासौ प्र
कृत्य तस्मादु त्रिंशतमेव वर्षाणि यजेतेत्यभिधाय आह यदि दाक्षायणयज्ञी स्याद्ध्योऽपि पंचदशैव वर्षाणि

२६

यनेनेतिशेषः दर्शमाससंनिधौपदिश्यमानत्वात्तद्बुद्धिजपितेः। तथा संपद्यते नाज्ञा। अत्र रव्येवमाशंक्य पर्यंते दृष्टिं योस्या
स्येप जनेन्द्र अमावास्ये अत्रो एव खलु सामस्य प्रभवतीति। दर्शपूर्णमासयागपदेहि एकैकः पौर्णमास्यमावास्या
यागः। अतु द्वौ द्वौ पौर्णमास्यमावास्यायागौ। तेन त्रिंशद्वर्षसंपत्सं न दर्शाभिरेव चोद्यैः सिध्यतीति वदंती श्रुति
र्दाक्षायणमतस्य दर्शपूर्णमासरूपतां गमयति। यदुक्तं नामांतरत्वात्कर्मांतरत्वमिति। न गुणांतरयोगादेकस्या
पि नामांतरं। तथा अत्रापि मयवस्यादि गुणांतरयोगान्नामांतरत्वेन कर्मांतरसाधकं। यथा घटः कलशः तु मरति।
यच्चोक्तं फलभेदात्कर्मभेदत्वमिति। समे। नतु फलं गुणानां। कथं। इत्थं। यद्यपि फलवाक्ये गुणांतरयुक्तास्ते यागाः सं
निहितास्तथापि यागानां पौर्णमासफलवाक्ये नैवत्व। तत्र श्रमो न तन्नत्वाद्गुणानां चात्रकासार्थत्वाद्गुणा एव फलसा
धनेन विधीयंते नतु यागाः। अतो दध्नेंद्रियकामस्य जुहुयादित्यादिस्थले गुणात्फलं न कप्रयोगानित्रघमापादयति।
यच्चोक्तं। गुणान्यत्वाद्गुणिनोप्यन्यत्वं भवतीति। तदपि त्वनैकांतिकं। यथोदाहृताग्निहोत्रे एव दधिलक्षणगुणा
न्यत्वेपि न कर्मांतरत्वं। यथा बालो वृ आम्रफलादेः। तथात्रापीति। तस्माद्गुणमात्रविशिष्टतो दर्शपूर्णमासयागावे
वेतावितिसिद्धं। विंतापाः प्रयोगनैरासापरामज्ञानुष्ठानप्रहे दर्शपूर्णमासयोरनुष्ठाने। अत्र न साहवा अ
स्य दर्शपूर्णमासाभ्यामिष्टं भवतीति श्रुतितथमुमेवार्थं प्रकाशयति। अथ दर्शपूर्णमासतः कालक्रमभेदेनह एम

२६

वींष्युपरिष्टात्॥ ॥ अग्नीषोमीयः पौर्णमास्यां मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गांतो ग्नीषोमीय एकादशा
कपालः पुरोडाशो भवति। अथ यत्पूर्वेद्युरग्नीषोमीयेणा यजते पौर्णमास्यामिति। केवलस्यास्य विधानादाग्नेयोपां
शुयाजयोर्निवृत्तिः॥ ॥ ऐंद्राग्नोमावास्यायां। मुख्यायामेवामावास्यायामुद्धरणादिकर्मापवर्गांते एव ऐंद्राग्नो द्वाद
शकपालः पुरोडाशो भवति। अथ यत्पूर्वेद्युरैंद्राग्नेन यजते मावास्यायामिति अत्रापि एकस्यास्यैव विधानादाग्ने
योपांशुयाजयोर्निवृत्तिः। स वै द्वे पौर्णमास्यौ यजते द्वे अमावास्ये इति द्वयोर्मुख्यामुख्ययोर्यागं विधायाथ यत्पूर्वेद्यु
रिति विधानाद्द्वे पौर्णमास्यमावास्या ग्राह्यो मुख्यार्थौ॥ ॥ सान्नाय्यवत्मातः। अमावास्यायां यमस्यामैत्रावरु
णीति अमावास्याया विशेषस्य वत्समारोणा वा पौर्णमास्यामेवानेन सूत्रेण विशेष उच्यत इति प्रतीयते। तेनमा
तः पौर्णमासीं प्रति परिसान्नाय्यवत्कर्म भवति यथा तत्राग्नेयः पुरोडाशः दधिपयसी वहविषौ। इंद्रश्च देवता। ए
वमिहापि भवतीत्यर्थः। अथ यथा तत्राग्नेयः पुरोडाशो भवत्यैंद्रसान्नाय्यमिति श्रुतेः। ऐंद्रसान्नाय्यमितिसूत्रेला
सान्निकस्य माहेंद्रस्य निवृत्तिः। अत्राग्नेः स्वस्थाने स्थित एव। उपांशुयाजस्थाने त्विंद्रसान्नाय्यममावास्याया
अप्रमृष्य विहितं। अग्नीषोमीयपुरोडाशस्तु पूर्वेद्युरपहृष्टस्तेषोत्र सुराविकारा एवैंद्रसान्नाय्यमित्यत्र तु दध्ये
व केवलं भवति न पय इति केचित। पयस्तु अमावास्यायामेव मैत्रावरुणी भविष्यतीति तथा च शाखांतरे एवं

र्धमत्वस्यापीति गम्यते। इतरथा चैवर्द्ध मैत्रावरुणीयागः स्यात्तर्ह्यौ पौर्णमासीति कस्य गुणत्वे विकारस्तस्मात्पौर्णमास्यां दध्ये
वेंद्रं चवलिनयपद्यत्याऊः। एवं चैकवचनमुपपद्यते। इतरथा दधिपयसोर्द्वित्वाद्द्विवचनं स्यात्। सान्नाय्यशब्दश्च तत्री
यते गोन्नेरिति सान्नाय्यमिति यौगिकत्वात्तस्यैव क्रमेव वर्त्तन इति। नलेन घृतमिव। शान्त पयेग्नीषोमीय एव पौर्णमास
हविः सान्नाय्यमावास्यं ऐंद्रं वा सान्नाय्यं राघु सान्नाय्यमित्यादौ समस्तयोरेव दधिपयसोरेकवचनात्तस्य सान्नाय्य
शब्दस्य दर्शनात् दधिनोस्येव मेदन्नेवतु न विभ्रायत इत्यस्य चदोषस्यापरिहारप्रसंगाच्च। तथा च दर्शपति सान्ना
य्यमाजनावाऽमावास्यात् इदस्तु पौर्णमास्यां क्रियते इत्यमावास्यायां सान्नाय्याभावमेवाह। तत्र च परिपयः
स्यामास्येव सान्नाय्यं। अतो यागांतरमेवेतस्य पयसः साधनकं वचनादमावास्यायां क्रियते। दधिपयसी तु अने
अपि वचनात्पौर्णमास्यां स्यातामिति। नन्वग्नीषोमीयः पौर्णमास्यामैंद्राग्नोऽमावास्यायामित्युक्त्वा सान्नाय्यव
व्यातरिस्तुभयत्र प्रातः सान्नाय्यविधानं कथं न भवति। उच्यते। अमावास्यामुपाराधप्रातःपयस्याविधानात्तान
तु तत्र सान्नाय्यमस्तु विभवतु विधानसामर्थ्यात्स्यपयस्यापीति चेन्न। नात्र यमातराग्नेयः पुरोडाशो भवति मैत्राव
रुणी पयस्या नेघत्तारस्यानीति लेवाग्नेयः पुरोडाशो येतावेव मित्रावरुणो द्वेदेवते इति श्रुत्याह विर्द्धपयस्येवावि
धानात्। आग्नेयमुस्का येतावेव मित्रावरुणाविति वैकाराय यशाद्दभ्यामप्यस्य हविरंतरस्य भावप्रतिपादनात्।

तस्मात्पौर्णमासीप्रतिपदि आग्नेयः पुरोडाशो दधिपयसी चेति त्रीणि हवींषि। अमावास्यायां चाग्नेयो मैत्रावरुणीपय
स्येति द्वे एव हविषी। उपांशुयाजस्त्विकत्रापि न भवति विधानाभावादिति॥ ॥ अत्र मुख्यपौर्णमासमुद्धूर
णादिकर्मोपवर्गांतमग्नीषोमीयं सर्वमेव प्रातः परिसमाप्य पुनरुद्धृत्याग्न्यन्वाधानवत्साशानशाखाछेददध्य
र्थवत्सापाकरणोपवेषकरणपवित्रबंधनानि यथाकालं कृत्वा सायंदोहमानंतरंहोहमातन्त्यव्यतिधानं तं कृत्वा प्रा
तर्दोहार्थवत्सापाकरणं शाखोदूहनं च कुर्यात्॥ ॥ अमावास्यायां पयस्या मैत्रावरुणी॥ प्रातरित्यनुवर्त्तते अमावास्या
यां प्रातः प्रतिपदि मैत्रावरुणी पयस्या भवति। अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्येति श्रुतेः। अत्राप्या
ग्नेयः स्वस्थानस्थित एव। पयस्या तु पूर्वा उपांशुयाजस्थाने विधीयते। ऐंद्राग्नस्य पूर्वेष्करपकृष्ट इति गुणविका
रोत्र। अत्र मुख्यामावास्यायां प्रातःकाले सर्वएवोद्धरणादिकर्मोपवर्गांतमैंद्राग्नयागांतं कृत्वा तदानीमेव पुनरुद्धृत्या
ग्न्यन्वाधानपितृयज्ञवत्साशानशाखाछेदनं स्तनमनोपवेषकरणपवित्रबंधनानि यथाकालं कृत्वा सायंदोहमा
नंतरं मैत्रावरुणपयस्यार्थवत्सापाकरणं कुर्यात्। तत्र मित्रावरुणाभ्यां मा गामिति गोरूपस्पर्शने विशेषः। शाखो
दूहनं च। प्रातर्विशेषमाह॥ ॥ तत्रैव दोहनं ष्कृतेवार ध्यमनपति। तत्रैव तस्मिन् लौकिके दधमे वाग्यनिर्वापानं
तरं पयस्यार्थं दोहनं कर्त्तव्यं। प्रथमं उखायां लौकिकं घनीभूतं दध्यमस्ति ञ्जेतसर्वः। अथवा पयस्ति ष्ठनेतमेस

तिपक्षाद्ध्यानपतिन प्रथमं। कोपि रिक्षेवं भावद्वहते। अमावास्यायां पयस्या मैत्रावरुणी न तत्रैव दोहनं। प्रातरिति अनुवर्त्तते। अ
मावास्यायां प्रातः प्रतिपदि मैत्रावरुणी पयस्या भवति। सांनाय्यवत्या नद्विति सायंदोहे प्रातर्दोहे च प्रातस्तस्या सायंदोहनिरस्त
र्थमाह तत्रैव दोहनं। तत्रैवेति प्रातरेव न सायमिति। तथा श्रुते वा दध्यानमप्रतीति वा शंकाहा रस्य त्रैवापयस्येति। किं दध्यप्र
तीति। एतदपि समीचीनं व्याख्यानं। अपरे— वं व्याचक्षते। सान्नाय्यवत्यास्तत्रिमभयत्र दधिपयसी स्त एव। तत्रैव
दोहनमिति। पयस्या पयोपि कारत्वान्निरूप्या। सं प्रातर्दोहनमप्रसक्तिन्निरमनेन सायंदोहपात्रारम्भमिति मात्रैवदोहनं प्रा
प्नोति तत्राप्यवाहोपं। नात्रैवेति। तत्रैव सायंदोहनधर्ममेव प्रातर्दोहनं कार्यं। अथवा अन्ते प्रातर्दोहे सायंदोहदधिनिनयेति।
एवं दधिपयोभ्यां पयस्या निष्पाद्यत इति पूर्वपक्षे दध्यपि मैत्रावरुणाभ्यामेवार्थे निष्पादनीय प्रसक्तिमपह्नते। आरब्धांतरेव प
यस्योसत्त्वात्तस्यैव प्रकारस्य दर्शनादिदमपि नानिर्मूलं। तथा चाहापस्तंबः॥ न तेम्या प्रातर्दोहे सायंदोहमानयतीति। तथा
चमानयोन सेमा प्रातर्दोहे सायंदोहमानीयामिक्षां करोतीति। सर्वत्र पयस्यानिष्पादने सायमेव प्रकारः। तथा च न संप्रदा
योच्छव विच्छिन्त इति। स्वश्रुतौ पयस्यानिष्पादनप्रकारस्यानुपदेशाच्छायायां तरस्मृ लितो निर्णयः॥ वाजिनं निषिद्धयो
त्कारं करोति। तप्ते पयसि दधि निनयेन्नैनेह तदधि पयसोः सारभूतं घनं पिण्डिनं संपद्यते सा पयस्या पयस्याद्यु उदकं द्रव्यं भवति।
तद्वाजिनमित्युच्यते। पयसो हासनकाले तद्वाजिनेनिषिष्य्यपात्रांतरे वस्त्रान्तद्वाजिनं पात्रांतरस्थमुल्करेकरा। राम

ति। सर्वहविषामासादनानंतरमुत्करे आसादयतीत्यर्थः। उत्करे वाजिनमासादयतीति सूत्रात्। वातद्देअवराणात्तत्सूत्रकारस्तु
आसादयतीत्यस्यस्थाने मापेणाकरोतेः मर्यादांकुरोति यथानरे तद्वेद्यासादयतीति श्रुतेर्वेद्यांकरोत्यपरंमोहृताशिम्प
इति। मिथेण ध्यस्तीति हवींषि वेद्यां कृत्वेति या अनाज्यलिप्तं च ॥ तत्रस्थाभिघारस्याय विकल्प॥ पयस्यामाज्यस्याभि
घारे अज्ञते कृते वाजिनं निषिंचेत्। पराघाकृते तत्र अनाज्यलिप्तं निषिक्तं भवति। तथा चरणात्वोतरं अनाज्यलिप्तं निषि
ञ्चेति। तदा च वाजिननिषेकानंतरं पयस्या वाजिनमोः हृद्यकृतमस्तीति घारणां। भाराणहानं वो भय पक्षेपि। अथवा अना
ज्यलिप्तं वा। वाजिनस्याज्यलेपो न कार्यः। अस्मिन्पक्षे वाजिनस्य तस्माभिघारणप्रसंगादनोपस्तरणाभिघारणानाम भावः। वाजि
नयागस्य कालमाह॥ ॥ सह समस्त्रणां तेन चरंति। तदा सह समस्तरहोमानंतरं प्रस्तर मध्यमदृढां न तत्र णास्यानुप्रहर
णां कृत्वात्मानमालभ्यापः स्पृष्ट्वा वाजिनेन चरति। वाजिनेन यागमनुतिष्ठति। यद्यपि सह समस्तरणामिति त्याग्यसहरणा
नंतरमेव वाजिनयाग उक्तः। तथापि प्रास्तरणां च स्रुचुष्मा इत्यात्मानमानमालभत इत्यपि कृतोत्तराप्रहरणानंतर
मात्मालंभस्य विधानात्मालंतेय विकृता विस्मनेन मायेन पर्वमात्मालंभोरको पस्पर्शो नेकृत्वैव वाजिनयागः कर्तव्यः। वा
जिनयागस्य कालांतरमाह॥ ॥ विमुच्य वा स्रुचौ॥ अथवा स्रुचौ विमुच्य यतास्थसीति मंत्रेण स्रुचौ धुरिस्फेताति
धनदानंतरं वाजिनेन चरतीति गतेन संबंधः। सवै पश्चाद्विवमज्जस्य जुहोतीति श्रुतेः॥ ॥ बर्हिरवसिंचनं कृणाति।

२९ इत्वलात्स्रुवेण ग्रहणोपायेन बर्हिरवस्तिन्वन्त्रिमुपरेत्राऽस्वधतीत्पक्षवशाच्चस्थालीमुखेनैव जुह्वांनि नयतीति धाहीविषके स्तनंतु
वेन । नहि स्रुवेण सह जुहूहणोऽत्रिपमणो बर्हिरवस्तियं नचाग्निमपागरिगुब्यामारस्ता भद्रहरता भद्रहणा पर्याप्तं वाजिनं संभ
वति । अतः स्थालीमुखेनैतेन स्रुचिनिर्यनं कार्यं । अत्र वाजिनस्याज्यले पनिषेधपक्षेनो पस्तरणाभिघारौ । अनुताभिघारणमा
त्रनिषेधपक्षेतु भवत एव । कस्मादेव समाप्यं हविषः स्कन्दनमुच्यतइत्यतआह ॥ ॥ तदृषभेषु रेतो दधातीति श्रुतेः । ग्री
ष्मांतरे एवं श्रूयते पद्धहिरिवासिंवनाटक्तू तितनहृषभेषु रेतोहृधतीति तेन श्रुतिवलादेव समाप्यमपि स्रुजमेव । नास्ति
वयनस्यातिभार इति ॥ ॥ वाजिभ्योनु वाचयति । ग्रहणानंतरं वाजिभ्योनुब्रूहीत्यनुवाचयति होतारं । तदनंतरमेवोप
रेशात ॥ ॥ प्रति वषट्कारं हुत्वा वाजिनस्त्रोषेणाहिंश्रोव्याघारयति दिशाइति प्रतिमंत्रं प्रदक्षिणं पुरस्तात्प्रथमं । हेतु
हिं अत्र द्वौ वषट्कारौस्तः । वषट्कारेणानुवषट्कारेण । तत्र प्रति वषट्कारं द्वयोरपि वषट्कारयोर्हुत्वा प्रजंति स्थानानुजुहोति
स्रुग्गनमागतस्य स्रुच्छेन वाजिनस्त्रोषेणादिशः प्रदिशाइत्यादिभिर्मंत्रैः प्रतिमंत्रं प्रतिदिशं सर्वासु दिक्षु आहव
नीयस्याग्नेः प्रदक्षिणं दिशो व्याघारयति दिशः कर्मसमाप्तौ अभिलेतीकृ स्थवाजिनस्त्रोषं तापयति अग्नेस्तृतीयक्षिप्रे
रोजुहोतीत्यर्थः ॥ तत्रापि प्रथमं पुरस्तात्प्राच्यां दिशि व्याघारयति । अत्र प्रदक्षिणग्रहणं पुरस्ताद्ग्रहणं चक्षोतं । अत्र एम
तस्त हन्यथा भावे स्रोतं प्रापक्षित । एवं चतुर्भिर्मंत्रैश्चतसृषु दिक्षु व्याघारणोपसिद्धे आह ॥ ॥ उत्तमाभ्यां मध्ये प्रबोद्धः ॥ २९

रा इत्यादीनां षण्णां मंत्राणां मध्ये उत्तमाभ्यां एव मध्यमाभ्यां उदिशः दिग्भ्य इत्याभ्यां मंत्राभ्यां यथाक्रमं अग्निमध्ये अग्नेः पूर्वा
र्द्धे सर्वे भागे वध्याघारयति। वषट्कारानुवषट्कारयोर्होमस्तु आहवनीयस्य पूर्वे भाग एव कार्यः। सर्वेमाडोवाग्रे जुहो
त्यग्ने वीहि तु वषट्कारेतितित्वि षट्कृम्याजेन सर्वे भागे वजुहोतीति श्रुतेः। अत्रैव विशेषमाह।।।। स्वाहाकारः सर्वत्र
साकांक्षत्वात। सर्वत्र दिशः प्रतिदिशः इत्यादिमंत्रे पु स्वाहाकारेनुषंजनीयः। दिग्भ्यः स्वाहेमंत्रे व पठितत्वात् रत्रे व्रधाप्रोतित्वा
मन्त्रे समतउच्यते सर्वत्रेति। कस्मात् न साकांक्षत्वात् दिशः इत्यादीनां मंत्राणां। साकांक्षत्वेते तेक्रियापदाभावात् अतः स्वाहा
कारो नुषज्यते निराकांक्षीकरणाय। ननु तर्हि स्वाहाकारयोगे दिग्भ्य इत्यादेः चतुर्थ्यां भवितव्यं। नैवं। मंत्रत्वात।
मंत्रास्येते मंत्राश्च पथ्यास्तु ताश्च मनुसंते। सुपां सुपो भवतीति मध्यमेव तत्र चतुर्थ्यर्थे षष्ठी भविष्यति।। ।।शेषमु
पहूपत्नेया मंत्रामंत्रम् अभहूताम् उपहूत इति मंत्रतः। शेषं स्रुक्स्थितं हस्ते भक्षणार्थं गृहीत्वा अमुको पहूपत्नी म
हूताय मनुजानीहीत्येवं होत्रादीन् सर्वान् आमंत्र्य अमंत्र पृष्ट्वा पृष्ट्वा उपहूत इति तेन प्रत्युक्तेन प्रत्येतानुज्ञातः सन्
तस्मिन् प्राशनं करोतीति। शेषमितस्य द्वितीयं। तस्य भक्षणमिति तैनानतया भक्षणार्थं हस्ते गृहीत्वेसे पा हूतस्य योजन।
स्यावहारिकैर्नामभिर्होत्रादः। नामानामंत्रणोपायमेवाह।।।। पुत्रनाम नामिर्वा। वा ऽ व धारणे। पुत्रनामानि यहोत्रादी
नि। तैर्होत्रध्यर्ध्वादीनामग्निरेवामंत्रणांकर्त्तव्येन स्यवहारिके मंत्रादत्त इत्यादिभिः। तेन होतरुपहूपस्वाद्यमेउप

३० ह्वयस्वेत्येवमामंत्रणं कार्यं ॥ ॥ प्रसंगात्सोमभक्षणेप्यमुं विधिमुपदिशति ॥ ॥ सोमेचासोमेपि अग्निहोमादौ ग्रहचमसादिस्थ
स्य हुतशेषस्य सोमस्यैवमेवहोतव्य उपह्वयस्वेति भाषितेन अमंत्रोपहूत इति तेन अनुज्ञातो भक्षणं कुर्यात। नानुपहूतः सोमः पात
व्य इति वचनात् ॥ ॥ अविशेषाद्धोमाभिषववषट्कारसमाख्याभिर्निमित्तैर्नानेकसाधारणेषु सोमेष्वसाधारणेषु ब
सोपहवे भक्षणे मा भूदित्याह ॥ ॥ साधारणेषु चासौ भक्ष्यत इति चावधारणे। साधारणेष्वेव सोमेषु सोपहवं भक्षणं। ना
साधारणेषु नाराशंसचमसादिष्वेषु तु ततः सा भक्ष्यंता। साधारणेष्वेव सोमेष्वनुज्ञाप्रार्थनेन समर्थं पुनर्भवति। अ
धिकपाने द्वेषाशंका मा हि भागीभः अनुज्ञा प्रार्थ्यते। अनुज्ञातस्याधिकपाने विद्वेषो न भवतीति। अतो होमाभिष
ववषट्कारसमाख्याभिर्निमित्तैर्नानेकसाधारणेष्वेव कृतेन्द्रोपहोमेषु सोपहवं भक्षणं भवति। नासाधारणेषु।
अथ वाजिनशेषभक्षणे मंत्रानाह ॥ ॥ हुतं त्वा वाजिनं भक्षयामीति। अनेन मंत्रेण वाजिनशेषभक्षणं सर्वे कु
र्वंति ॥ ॥ वाजसहे वाजिनस्योपहूतस्योपहूतो भक्षयामीति। अनेनैकाभक्षणं कुर्वंति ॥ ॥ वाजे वाजी भक्षयामीति वा।
अनेन वा वाजिनशेषं भक्षयंति। अथ भक्षणक्रमं भक्षयितॄंश्चाह ॥ ॥ होत्रध्वर्युब्रह्माग्नीध्रयजमानाः वाजिनशे
षमनेनैव क्रमेणोपहवपूर्वकं भक्षयंतीति शेषः। तादृशं चैव भक्षयंति होता वाध्वर्यु अब्रह्मा चाग्नीध्रयजमा ताम
न इति श्रुतेः ॥ ॥ प्रथमो वो भक्षयतस्तु यजमानः। अथवा यजमानः प्रथमो वाजिनशेषं भक्षयति। ततो होता। ततो ध्वर्युः। ३०

ततो ब्रह्मा। ततोग्नीदिति। अस्मिन्मन्त्रे उभयतस्तु यजमानः। तु पुनः। अस्मिन्मन्त्रे उभयतः प्रथम उत्तमश्च यजमानो भक्षयति। प्र
थमो यजमानो भक्षयति अथो अफत्तम इति वचनात्। तेनाग्नीधे अंतरं पुनर्यजमानो भक्षयति। ततश्चोपहवप्रार्थने प्र
थमं पश्चाद्ध्वर्युयजमानः। सार्वैः प्रष्टव्यः। यजमानोपह्वयस्व। होतरुप। अध्वर्यवुप। ब्रह्मन्नुप। अग्नीदुप। यजमानोपह्वयस्वे
त्येवं। उपहवप्रार्थनं चमस्यं भक्षणाय हस्ते गृहीत्वा कर्त्तव्यं। ततो भक्षणं॥ एवं क्रमेण सर्वैर्भक्षणं कर्त्तव्यं। न तु सहप्रक्र
मेण॥ ॥ इन्नायणां वा दक्षिणा। राज्ञः क्रयणं सुवर्णमुच्यते। तेनात्र हिरण्यं दक्षिणा। तच्च शतमानं। रक्तिकाशतपरिमि
तमित्यर्थः। हिरण्यपरिमाणे मत्रापीत्यश्वमेधे सत्रगणे तच्छला हार्योवेति विकल्पः॥ ॥ संवत्सरं वा यजेत। यावज्जी
वं वा पंचदश वर्षाणि वा यजेतेति भाष्यमुक्तं। अधुना यज्ञान्तरमभिधीयते। अथवा राज्ञापत्या यज्ञेन संवत्सरं येनु
ता संवत्सरमिति कालाध्वनोरत्यन्तसंयोग इति द्वितीया। साकल्येन संयोगश्चात्यंतसंयोग इत्युच्यते। तेन सकलं। सं
वत्सरमिति कालाध्वनोरत्यंतत्र राज्ञापणयागेन आसुपारित्यर्थः। अत्र संवत्सरः सावनः परिगृह्यते न चांद्रादिः। य
तोऽत्रापि पक्षे संवत्सरयागस्त पलकर्त्तव्या। पंचदशभिर्वर्षैर्यावत्य इष्टयो भवंति तावत्य एव संवत्सरयागपक्षेपि संपादनी
याः तावत्सख्या सावनसंवत्सरे संपद्यंते नान्यस्मिन्निति। तत्रैवं। प्रथमपौर्णमास्यां आद्धातारं मणीया पूर्ववत्कोग्नी
षोमीययागः। पुनरुद्धस्य समाप्त्यापवर्गउपक्रमः। प्रतिपद्याग्नेयेन पुरोडाशेनैंद्रेण दध्ना पयसा च यागः। एते

वैमृधः ।मांसमैथुनस्वर्जेन संकल्पः ।पुनरुद्धृत्य तस्मिन्व्रतिपरिश्रित एवैन्द्राग्नयागः ।पुनरुद्धृत्य मैत्रावरुण्याः पयस्याया उपक्रमः ।
प्रातर्द्वितीयायामाग्नेयेन मैत्रावरुण्या च यागो यथोक्तः पक्षे आदित्यश्चरुः ।तद्दानीमेवपुनरुद्धृत्याग्नीषोमीययागः ।
ततः पुनरुद्धरणादि हविर्यागप्रक्रमः ।प्रातस्तृतीयायामाग्नेयपसान्नाय्ययागः ।पक्षे वैमृधः ।तदानीमेवोद्धृत्य सैन्द्राग्न
यागः ।पुनरुद्धृत्य मैत्रावरुण्या उपक्रमः ।तदनंतरमादित्योवा ।इमेवं प्रकारेण संवत्सरं यावत्समहं कर्तव्यम् ॥
मासस्त्र्यन्तथा च कृतवत्सांसि वर्जयेत ।मांसमरूणांन कुर्वीत ।स्त्रियं न गच्छेत अनृतं न वदेत ।सूत्रं कृतं रजक
धौतं वासश्च न परिदधीत ।सूत्रकृतमिति कारुधौतं ।तत्कृतवस्त्रं तन्निर्मितं वस्त्रं परिहार्यं वा न्तरधीनत्वा
देवकरणासा एतानि ।पौर्णमास्याममावास्ययोरंतरालेवर्जयेत ॥ पौर्णमासीत आरभ्यामावास्यापर्यंतोऽपि नियम
विधिः ।अहनि मांसमैथुने वर्जयेत् हिंसेत तु कर्मणि वर्त्तमाने भवत्येव ।अयंतु पर्वांतरालनियमः ।दर्शपूर्णमा
सप्रकरणमेव समाप्तम् ।अथाग्नेयोऽष्टाकपालः पुरोडाशो भवति सुप्रजास्त्वकामस्य पोजं विंदति ।
यत्कामो ह वा एतेन यज्ञेन यजते सोऽस्मै कामः समृध्यत इति ।इममेव काम्यमाग्नेयं प्रकृत्योपांशुत्वे विहितमस्ति ।स
महद्धिंकुर्वीत सप्तदश सामिधेनीरनुब्रूयादुपांशु देवतां यजति तस्मिन्हि रूपमर्द्धं त्वस्यै याज्यानुवाक्ये स्यातां वार्त्र
घ्नावाज्यभागौ विराजौ संयाज्ये इति ।अस्य चोपांशुत्वेतु चकारेणोत्तरवक्ष्यमाणंतस्य यज्ञो नाम यज्ञापि पस्य पसोपांशु

त्वेभवतितस्मात्तस्योच्यते॥४॥ ॥उपांशुकाम्यदेवता॥काम्यस्यकर्मणोदेवताउपांशुभवति।यज्ञाथर्वणंवैकाम्याइष्ट
यस्तस्मात्ताउपांशुकार्याइतिश्रवणात।ननुवरुणप्राघेरेवंदेवतामन्त्रेतिप्रागुक्तत्वादुपांशुकाम्यमितिचेता।वदेव
स्तत्रैककर्तव्यं।नदेवताग्रहणं।अंगप्रधानदेवतानामविशेषेणोपांशुत्वंमाभूत्प्रधानदेवताया एवयथास्यादितिपु
नर्देवताग्रहणं॥ ॥आग्रयणोवैश्वदेवः।आग्रयणेयोवैश्वदेवश्चरुः।सउपांशुभवति।आग्रयणादविशेषोपादानादस्म
त्रप्याय एव॥ ॥एककपालाश्चावारुणाः।वारुणवर्जिताश्चयेसर्वेएककपालाःपुरोडाशाद्यावापृथिवीयादयउपांशु
भवंति॥ ॥प्राजापत्यः।सर्वत्रप्राजापत्यःपशुश्चरुःपुरोडाशोवाउपांशुभवति।तस्माद्यलिंगप्राजापत्यपत्तेक्रियतउ
पांशुदेवताक्रियतइतिश्रुतेः॥ ॥सावित्रश्चातुर्मास्येषु।चातुर्मास्येषुयःसावित्रद्वादशकपालोऽष्टाकपालोवेतिविहितःसा
वित्रःसउपांशुभवति।चातुर्मास्येष्वितुक्तेचान्यत्रसावित्रस्यनोपांशुता॥ ॥वैश्वदेवी।चातुर्मास्येषुयावैश्वदेवेपर्व
णिवैश्वदेवीपयस्यासोपांशुभवति॥ ॥विश्वदेवीतिस्त्रीलिंगनिर्देशाच्चातुर्मास्येषुपांशुकेष्ववैश्वदेवःपशुस्त
स्यपशुपुरोडाशश्चतद्देवत्यावनोपांशुभवंति॥ ॥वायव्यं।शुनासीरीयेवायव्येवायुदेवत्यंहविरुपांशुभवति।प
योवायव्यं।अत्रापिचातुर्मास्येष्वित्यनुवर्तते।तेनप्रजातेवायव्यमित्यादेनोपांशुत्वं।ननुवायव्यमितिनपुंसक
निर्देशात्पयःपयस्तएवोपांशुत्वंभविष्यति।नपवायव्यपस्ते।नैवं।तेषांवैचतुर्णांद्रव्याणांत्रीणिहवींषिनरुक्ता

नि भवंति द्वे द्वे रूपे ईरिते हविः संबंधेनैवोपांशुत्वविधानात्तेन चापवर्गहविरित्येव व्याख्येयं । अतोपवाग्रहपक्षेष्वेकपांशुत्वं भ
वत्येव । एवं च वैश्वदेवे त्रीणि हवींष्युपांशु भवंति सावित्रमेव व्याख्येयं । अतोपवाग्रहपक्षेष्वेकपांशुत्वं भवत्येव । एवं च वै
श्वदेवे त्रीणि हवींषि वैश्वदेवी द्यावापृथिवी पयस्येति । वरुणप्रघासेषु द्वे सावित्रः कायश्च । साकमेधहविषि द्वे सावित्रो
वैश्वकर्मणश्च । शुनासीरीये त्रीणि । सावित्रो वायव्यः सौर्यश्चेति ॥ ॥ तत्र हवींषि । तत्राग्नये पवमानायाग्निर्वपतीत्या
दीनि त्रीणि हवींष्युक्तानि एतानि त्रिसत्वस्तत्र रिस्तु कल्पनात्तत्राग्नये पवमानाय प्रथमामग्नये पावकायाग्नये शुच
ये द्वितीयेत्येतानि त्रीणि तत्र हवींष्युपांशु भवंति ॥ तत्र चोक्तमेताश्चाग्न्याधेयस्य प्रतिरूपत्वात्तत्र उपांशु कर्त्तव्या
इति श्रुतेः । अत्रैव हि ग्रहणात् सांगानामेतेषामुपांशुत्वं केचिदाहुः । तन्न युज्यते । तत्र हवींषीति ईशानत । देवसूदेवि
का हवींषीति वचनात् । तत्र चोक्तमेता अग्न्याधेयस्य प्रतिरूपा इतीह हि ग्रहणात् सर्वोपांशुत्वेति चेत् । नापत्ताघर्वणां वैकाम्याद्
रूपत्वमत्रापि समानत्वात् । अत्र तु सूत्रकारेणाग्निः संदिग्धदेवताया एवोपांशुत्वमुक्तं उपांशु काम्यदेवतेति । तथा च
मानवे । अग्न्याधेयविकारेष्टयः सद्यस्कालाः सर्वा उपांशुदेवता इति । काठके च ॥ अग्नये पवमानाय प्रथमो । अग्न
ये पावकायाग्नये शुचये द्वितीयामुभे उपांशुदेवते इति । सांख्यायनेपि । सर्वा सूपांशु हविर्हेतु स्मृतं । ननु सर्वा उपां
शु भवंतीति । अत्र तत्र हविःष्विष्टिरवते वोपांशु । न सकला इष्टयपति ॥ ॥ हिरण्यीयाम्यापरणीयातिथ्या देवताः । सिद्ध

णीप्रादीनां देवता उपांशु भवंति। उपांशु चरंति प्रागग्नीषोमीयादित्यस्मिन्सूत्रे हरणीप्रादीनां सकलानादिष्टानां सदेव
ताकानामुपांशुत्वं सिद्धमेव। यद्यनुवागंतेन वारीतरणीयांनीवेस्तरांनीवेस्तरा मितरे इति पक्षस्तथापि हरणीयादि
देवतानामुपांशुत्वविधानार्थमिदं सूत्रं॥ ॥देवसूदेविकाहवींषि। वक्ष्यति। अग्नीषोमीयपशुपुरोडाशमनु देवसू
हवींषि निर्वपतीति। पशुपुरोडाशमलंकृत्वं ध्रुवसदे देविकाहवींषि निर्वपतीति च। इमानि देवसूहवींषि च उपांशु भवं
ति। उभयत्रोपांश्वेतानीषि हितिश्रुतत्वात्॥ ॥वायव्योग्नेः। अग्नेयमनेवा यवेयानि पुलत्वेत श्वेतन्लशुद्री तिअप्रवंवा
यव्यः पशुरुपांशु भवति॥ ॥मैत्रावरुणी च। अग्नावेव। अत्रैव पयस्या मैत्रावरुणी रूपरामिसुनदहितेणोद्वसानीयांत
इति या मैत्रावरुणी। सोपांशु भवति। अथ मैत्रावरुण्या पयस्यया यजत इत्युपक्रम्य सोपांशु भवत्युपांशु हि तेः सिद्ध
त इति श्रुतत्वात्॥ ॥ऐंद्रः सौत्रामण्यां प्रथमः। सौत्रामण्यां प्रथम ऐंद्रः पशुरुपांशु भवति। त्रिपशुमध्ये वर्तमानस्यैंद्र
रूपमइत्तसस्यवाहस्येर्थ प्रथम इत्युक्तं॥ ॥वायोधसश्च। सौत्रामण्यामेव वर्तते पशुर्गणप वयोधस इति वायो
धसः पशुरुपांशु भवति। लोकाद्वायोधस्तस्मात्सो निरुक्त इति श्रुतेः॥ ॥आग्नेयं प्रतिकाममाहरेत॥ आग्नेयम
ष्टाकपालं पुरोडाशं प्रतिकाममाहरेत। कुर्यात् कामं कामं प्रति प्रतिकामं। पत्क्वि विकाम प्रत्येतस्य सर्वस्य साध
कोपमिसर्वः। इममेव प्रकृतस्य श्रुतौ पठ्यते। यत्कामो ह वा एतेन यज्ञेन यजते सोस्य कामः समृध्यत इति। वर्षी

३३ पेयकृतौ वा ब्रूयादृद्धिकामोस्मीति। आग्नेये प्रतिकाममाहरेतेत्युक्तं। तेन ऋद्धिकामस्याप्याग्नेयः प्राप्नोति। तत्र विशेषमु
क्तैति। वर्षार्थेष्टं यदाग्नेयेष्टिः प्रमादतो यजमानउद्धरणकाले ऋत्विजः प्रति एवं ब्रूयादृद्धिकामोस्मीति। अथवा प्रकृतौ
मा कृतदर्शपौर्णमासेष्टावेवैवं ब्रूयात्। तेनैव सिद्धो ह ऋद्धिकामः एषणाश्रेपीति शिं कुर्यात्। प्रकृताविव वा ऋद्धिका
मोस्मीमाहिकं अधिकं कुर्याद्धिस्याग्नेयाः प्रकृत्येष्वाविकल्पः॥ ॥अध्वर्युर्ब्रूयात्तु रोवा तेयविद्युतं च मनसाध्या
येति। मा कुर्यात्तेभ्यो अध्वर्युं प्रति यजमानो ब्रूयात्॥ ॥स्तनयित्नुं च वर्षं चेति होतारं। स्तनयित्नुं च वर्षं च मनसा ध्या
येति होतारं प्रति यजमानो ब्रूयात्॥ ॥सर्वा देवता नीति [illegible] ब्रह्माणं। यजमान एव ब्रह्माणं प्रति सर्वा देवता नि मनसा
ध्यायेति ब्रूयात्। एतानीति चेत् छन्दः माग्नुक्तं पुरोवातं चेत्यादिपरः। नेतानीत्येवंविधस्यादृपरः। तेन पुरोवातं च
विद्युतं चाग्नीध्रं स्तनयित्नुं च वर्षं च मनसा ध्यायेत्येवं ब्रह्माणं प्रति ब्रूयादिति केचित्। यथोक्तमेवेमपरे। सर्वा
देवता नि मनसा ध्यायेति ब्रह्माणमित्येवंविधस्यैवाश्रुतत्वात्। यथा ऋद्धिकामः स्यादिष्ट्वा वा यजेतेति प्र
त्यक्षमस्वर्वेमितछ्यते। दर्शपूर्णमासयोराग्नेयाश्च सर्वे कामा येन तादृद्धिकामस्यान्यामप्यविशेषत्वभयोरुक्ताः॥ ॥
अन्वारंभणीयाग्नावैष्णवएकादशकपालः सारस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारंभे। दर्शपूर्णमा
सारंभे प्रथमप्रयोगेऽन्वारंभणीया इति भवति। उद्धरणादिकमोपवेशांता। तत्रानीणाहवींष्यपरिज्ञाति। अ एप
३३

ग्नावैष्णवः । अग्नाविष्णू रैवत एकादशकपालः पुरोडाशः प्रथमं हविर्भवति । सरस्वत्यै चरुर्द्वितीयं हविर्भवति । स
रस्वते द्वादशकपालः पुरोडाशस्तृतीयं हविर्भवति । चरुशब्देनानवस्रावितान्तरोष्मपक्वो विशारश्च ब्रीहितंडुलसिद्धो ।
दन उच्यते । उदनो हि चरुरिति श्रुतेः । स्थाली तु तत्संबंधात्तल्लसहते सल्वेपं चरुमित्याहे । तत्र चैतेषामाहूताः पदार्था न
भवंति । पेषणंयवनं वापस्तापश्चोपहितिः प्रथा । मार्जनाध्यूहनज्वालनघीप्रूहूससादनमिति । अग्न्यार्थः ।
पेषणं चूर्णनं । यवनं पिष्टस्योदकमिश्रणं । वापः उदकमिश्रणोपयस्थामसेचः । तापः कपालानामंगारैः प्रताप
नं । उपहितिरंगारेषु कपालस्थापनं । प्रथा । कपालेषु वस्थापितस्य पुरोडाशस्य हस्तेन घट्टनेन सर्वेषु कपालेषु
प्रसारणं । मार्जनं श्लक्ष्णीकरणं । अध्यूहनं भस्मनोंगारैश्चोपर्याछादनं । ज्वालादर्भैरवज्वलनं । घ्यूढुससादनं ।
कपालेभ्यः पृथक्कृस्य पुरोडाशावस्थाचोन्मासादनं । चरुलक्षणं छंदोगपरिशिष्टे । स्वशाखोक्तश्च मुस्तिस्रोः घ
दग्धः कठिनः शुभः । न चातिशिथिलः पाच्यो न चरुश्चारसस्तथेति । स्थालीलक्षणमपि तत्रैवोक्तं । तिर्यगूर्ध्व
समिन्मात्रा दृढा नातिबृहन्मुखी । मृन्मय्यौदुंबरी वापि चरुस्थाली प्रशस्यते । तथा मेक्षणेन चरोरवदानं कार्यं । तच्च लक्षणा
मपि तत्रैवोक्तं । इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् । वृत्तं चांगुष्ठपृथ्वग्रमवदानक्रियाक्षममिति । इयं
चाधानानंतरं प्रथमपौर्णमासांमातस्याह्यानेतरं पूर्वाह्न एवमसपो भवति । द्वादशाहात्र्याघग्निधारणमध्ये ल्वे

२४

त पौर्णमासी भवति। तदाते द्वेवध्नं तेष्वग्निषु अन्वारंभणीयापौर्णमासेष्टिश्च काम्यो। अमथ्याएथकयथसुद्धमसत्रा
रंभइत्युक्तत्वात्प्रथमप्रयोगएवान्वारंभणीया। दर्शपूर्णमासावारंभमाणोन्वारंभणीयया यजेतेति शाखान्तरात्।
इयं च दर्शपूर्णमासविकारेषु सर्वेष्वपि प्रथमारंभे भवति। तत्र नित्यानामारंभे सकृत्। काम्यानां चारंभे पुनः पुनः काम्येसो
मसौत्रामणीवर्जे। तथाचोक्तं। नित्यानां सकृदारंभे काम्यानां च पुनः पुनः। सोमसौत्रामणीवर्जं अन्वारंभः प्रशस्यत इति।
अत्र मानवसूत्रे विशेषः। मेक्षणेन वरूत्रीः स्विष्टकृते समवद्यतीडायै च मिथुनौ गावौ दक्षिणा सत्त्वाके मेक्ष
णमत्वध्यस्यतीति॥ ॥पष्ठौही दक्षिणा। मिथुनौ वा। अन्वारंभणीयायां पष्ठौही गौर्दक्षिणा। मिथुनौ मिथु
नार्हौ गावौ स्त्रीपुरुषरूपौ वा दक्षिणा। पष्ठौही बालगर्भिणीत्यमरः। बाले वयागर्भिणी सा पष्ठौहीत्युच्यते। अथ
वा मिथुनौ मिथुनार्हौ गावौ स्त्री गवी पुंगवश्च दक्षिणा। ननु मिथुनशब्दे स्त्रीपुंयुग्ममुच्यते द्विवचनात्तु द्वे स्त्रीपुंयु
ग्मे कुतो न भवतः। उच्यते। मिथुनौ ते गावौ इति प्रशस्ते मा इत्यत्र निश्चितं एकैकस्मिन्नेव स्त्रीपुंयुग्मस्य दर्शनात्। अत्रापि
तथा दर्शनात्॥ ॥इंद्राय विमृध एकादशकपालः पौर्णमासमनु॥ पौर्णमासमनु पौर्णमासेष्टिसमाप्त्यनंतरं
तद्दानीमेव इंद्राय विमृधे एकादशकपालः पुरोडाशो भवति। उद्धरणादिकर्मोपवर्गांतः॥ ॥आदिविकल्पः। की
दृशो वैमृधः॥ आदिविकल्पः॥ आद्यावारंभ एव विकल्पो प्रयस्ततथा। आरभ्यते न वेति। प्रथमारभ्यते तदा यावज्जी

राम
२४

वैक्रिपत्तवा नारभते नेत्वहापि नक्रिपत एवेति। तथाचोक्तं रूपं कालोनुनिर्वाप्यः श्रपणं देवतास्तथा। आहोपेविधत्ता:
पञ्चास्त इमे सर्वे हास्तकताइति। इमे चैवादिविकल्पः। अन्ये सर्वे पीइष्ठाविकल्पाः। रूपं दर्शपूर्णमासे दाक्षायणादि
कालउदितानुदितादिः। अनुनिर्वाप्यः वैमृध आदित्यश्च। श्रपणं गार्हपत्ये आहवनीये चेति। देवता इन्द्रो महेन्द्रो वे
ति। एतेषां मध्ये मस्याहोस्वीकारः कृतः। स एव सर्वत्र भवति न पक्षांतरं॥ ॥ आदित्यश्चरुः एमावास्ये। अमावास्यमनु
अमावास्येति समाम्नानं तदंते तस्मीमेव मध्ये पुरुष आदित्यश्चरुः। कर्मापवर्गो तो भवति। अन्वाहार्ये दक्षिणा एव।
अपमथ्यादिविकल्प एव। पूर्वे निर्वपतीति विधायतस्मान्नानुनिर्वपेदित्युभयो विहितप्रतिषिद्धत्वात्॥ ॥ दाक्षा
यणायज्ञस्यापि दर्शपूर्णमासवत्तन्त्रत्वेपि वैमृधादित्योर्विकल्पेन भवत एव॥ ॥ अथाग्रयणां सूत्रं यति॥५॥
॥ आग्रयणमैन्द्राग्नमग्रपाकस्य व्रीहीणां यवानां च। आग्रयणमिति वक्ष्यमाणस्य कर्मणः संज्ञा स्तव्यवहारार्थो
गो। आग्रयणं इत्याहो। व्रीहीणां यवानां चाग्रपाकस्य प्रथमपाकस्याग्रयणमंतं कर्म भवति। तच्च प्रथमं हविरैं
द्राग्नं। ऐन्द्राग्न एकादशकपालः पुरोडाशो भवति। तान्विन्द्राग्नी उदजयतां तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो
भवतीति श्रुतेः। शारदि व्रीह्याग्रयणं। वसंते च यवाग्रयणमिति केचित्। केचिदग्रपाकस्य मनुरोधात्प्रथमप
क्वव्रीहियवादिसंपत्तिकाल एव कुर्वंति। तथा चोक्तं शाखामन बालेणो। अथ व्रीहिसस्यस्य वा यवसस्य वा आगते

३५ तिनयावर्षासु आगतेश्यामाकसस्यपक्वे सुवेत्तु यवेष्विति च ॥ जैतानसूत्रे च । पक्वास्वोषधीष्वाग्रयणेष्टिरिति । अनेन उभय
योक्तं । कात्यायनेन । शरद्वसंतयोः केचिन्नवयज्ञं प्रयच्छते । धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः इति । मनुः व्रीहि
यवानां हविषीत्ति मागुरुक्तत्वादग्रपाकस्येत्येतावदुक्ते पि व्रीहीणां यवानामग्रपाकस्येति । इति भ्रान्ति । किमर्थं व्रीणां
यवानामिति ग्रहणं । उच्यते । वैश्वदेवश्चरुरिति वक्ष्यति सोऽपि यवमयोऽपि स्यादिति यवानामित्युक्तं । अन्यथानु
क्तेश्यामाकस्य व्रीहितंडुलेसिद्धान्नेरुटलान रनोहि चरुरितिश्रुतेश्चरोरोदनत्वाद्यवाग्रयणेऽपि चरुर्व्रीहितंडुलमय एव स्या
त । अत एव यच्चाद्यमत्रव सनो भावे व्रीहिमय एव चरुर्भवतीति गम्यते तेनात्र यवानामित्युक्तमुक्तं । एतावत्येवोक्तं तेषामे
वाग्रयणानि तिनियमो मामूदिति व्रीहीणामित्युक्तं ॥ ॥ वैश्वदेवश्चरुः ॥ द्वितीयं हविर्विश्वदेवश्चरुर्भवति । अस्य चोपांशु
त्वमुक्तमाग्रयणे वैश्वदेव इति ॥ ॥ पयसि वा ॥ वैश्वदेवश्चरुः पयसि दुग्धे वा श्रपते । वा उदके । तत्र पयः पक्षे दुग्धोपस
र्जनीनिनयनेमंत्रऊहनीयः संपय उषधीभिः संमोषधयो रसेन । सरेवतीमरुतीभिः इत्यत्रतासं मधुमन्मधुमन्मधुमती
भिः इत्युक्तामिति ॥ ॥ द्यावापृथिवीयएककपालः ॥ तृतीयं हविर्द्यावापृथिवीय एककपालः पुरोडाशो भवति । अस
चोपांशुत्वमुक्तमेककपालाभ्यां वारुणौ इति ॥ ॥ उद्वासंतोनाभ्यर्छाद्येदाज्येन द्यावापृथिवीयं उद्वासयमानाहना
नं तस्मस्य द्यावापृथिवीयस्यांतान्श्राज्येन लौकिकेन घृतेनाच्छादयेत प्रोक्ष. तच्च विरू तावित्यनेन मयमेम्सा राम
३५

णदानानंतरमस्य द्यावापृथिवीयस्योत्तानं आज्येन लौकिकेन घृतेनाघारयेत्। प्राकृतं चविहृतानुविस्मनेन प्रथमे प्रा
णदानं तत्तेनाघारइतमिति। अस्य द्यावापृथिवीयस्य सर्वं स्यावदानं। उपरिष्टाद्धिरभिघारणं चतुरवहृत्य सं पारस्नाम।
पैवावत्तलवंस्ते पारनाम तु उपस्तारोपिद्धिः कर्तव्य॥ छं हागगहत्पेन यादृशीनाम। सर्वहोमः। तथा समंत्रेन होमः क
त्रे मोपयान वर्पाय त्रैते उत्तानेन भवति। आपस्तंबः। यदि रुतः पर्याव त्रैतस्त चोत्रेण कल्येयन्त्र पालिना। आश्वलायनाभिवा पि
उ नहोतव्य इमिके॥ तानवे॥ एककपालमस्योपांशुमलंकुर्वन्नभिपूरयति। प्रचरणावेलायां बर्हिः विशाद् पित्वोपस्ती
र्यैककपालेस्तृ सर्वमवघ्रमाणाञ्जयस्यालासि द्यद्धिरभिवर्पेणांश्वेककपालेन प्रचर्य वषट्कृते मध्येपाणिनाजुहो
त्यं जु प्रतिष्ठित मात्रयेनाभिजुहोतीति। अस्य वैश्वदेविक द्यावापृथिवीयप्रकृतिलं जैमिनिनोक्तं। एककपालानां वै
श्वदेविकः प्रकृतित्वं अस्य प्राणोस्त्वं होमापरिवृत्तिरर्थात् इति। पक्षांतरमाह॥ आज्यस्य वा यजेत। अथवा द्यावापृ
थिवीयमाज्यस्य यजेत। आज्यमेव ध्रुवायाश्चतुरवत्तमवदाय यागः कर्तव्यः। न पुरोडाशेन। तस्मादाज्यस्यैव यजे
दिति वचनात्। आज्यपागयज्ञेषु पांशुलं भवत्येव। श्रुणुवा तरं भागं संबंधेन वोपांशुत्वस्य दर्शनात्। वैश्वदेवद्या
वापृथिवीयोवोपांश्विति॥ ॥पुराणानां वा चरुः॥ अथवा वैश्वदेवश्चरुः पुराणानां जीर्णानामेवम्पवानां व्रीहीणां
नवकृतेश्यो वा नवानामिति तुल्यो विकल्पः॥ ऐन्द्राग्न द्यावापृथिवीयौ पुरोडाशौ भवानामेव यवानां व्रीहीणां

३६ यवकर्त्तव्यो वा नवानामिति तुल्यो विकल्पः। ऐंद्राग्नद्यावापृथिवीयौ पुरोडाशौ नवानामेवान्नरूपग्रहणात्॥ ॥प्रथमजो
गौर्द्दक्षिणा। अस्मिन्व्रीहियवाग्रयणे प्रथमजो गौर्द्दक्षिणा। तस्मिन्वर्षे जाता प्रमातानां वत्सानां यजमानस्य गोहे
पः प्रथमो जातो वत्सः स दक्षिणा। पेमावीनमेकाष्टकायां वत्सा जायंते तेषां प्रथमजं दद्यादीत्यापस्तंबः॥ वत्सः प्रथ
मजो दक्षिणेति शांखायन॥ इष्टिद्वयाग्रयणमेकमेव शरदृतौ संतन्योरभ्यसते। दैवतैकत्वात् दर्शपूर्णमासवत्तन्त्र
व्रीहियवरूपसाधनद्रव्यभेदाच्छिन्नकर्मत्वं दर्शपूर्णमासवदेव। यथा व्रीहियवरूपसाधनद्रव्यभेदेपि दर्शपूर्ण
मासयोर्न भिन्नकर्मता एवमाग्रयणयोरपीति तेन द्वयोरेकैवान्वारंभणीया भवति। अधिकारोप्युपजीव्यत्राह॥ ॥
वैश्वदेवस्य च। वैश्वदेवमिति चातुर्मास्यानां प्रथमं पर्व। एतद्वैश्वदेवमिष्टिकृत्वा न। तत्र वैश्वदेवे पर्वणि चकारात्प्र
थमजो वत्सो दक्षिणा। तत्रापि हविर्यज्ञो हि तस्य प्रथमजो गौर्दक्षिणेति श्रुतेः॥ ॥दर्शपूर्णमासावनीजानो दक्षि
णाग्निपक्वं यावत्तु आग्रयणं व्राह्मणान्भोजयेत् लिंगविरोधात्। एतत्कमुक्तं स्यादिति निमित्तवत्त्वात् दर्शपूर्णमासारंभोत्कर्षे
सति आग्रयणकाले आगते तदतिक्रमशंकायां प्रयमकारः। दर्शपूर्णमासावनीजानः निमित्तवशात् दर्शपूर्णमा
सान्वामनिष्ट्वा यजमानो नवमन्नं व्रीहियवरूपं दक्षिणाग्निपक्वं दक्षिणाग्नौ पक्त्वा किं प्रकारेण मन्ने यावत्तु आग्रय णम
चतुःस्पांतस्ति पर्याप्ते चतुरो व्राह्मणान्भोजयेत्। तेभ्यो भुक्तवद्भ्यः किंचिद्यथाशक्ति दक्षिणां दद्यात्। अत्र व्राह्म ३६

णान्नेनैवाग्रयणं सिद्ध्यतीत्यभिप्रायः तद्यथावषट्कृतं हुतमेवमस्यैतन्मद्वती श्रुतन्हूयान्वाहर्त्ति इतिस्मृतेः यद्युअनीजा
नः स्याद्वानुश्राद्धमेवैतस्मोद्धृत्यमन्वाहार्यपचने पचेत्पुरस्ताद्व्राह्मणाग्रयणाश्वश्री पुरिति —श्रौत छन्दोमान्नहूयान्वाहर्त्तिणा हविः
स्यादिमाद्रुरिति च श्रवणात्। एतन्नावेशं दर्शपूर्णमासारंभाभावे ज्ञेयं। दर्शमासारंभे कृते दर्शेष्ट्यनंतरं वैशाखे आ
ग्रयणस्य कर्तुं शक्यत्वात्। वैशाख्यां दर्शपूर्णमासारंभे वृतश्चेदनंतरं ज्येष्ठे वसंताभावादाग्रयणकालातिक्रमः स्यादि
त्ययं प्रकारोनुष्ठेयः। अस्याथाग्रयणत्वात्पौर्णमास्याममावास्यायां वानुष्ठानमिति यद्यप्याग्रयणेनेष्टाग्रयणाग्र
हणस्यैव समर्थत्वात्। इष्टिरूपस्याग्रयणस्य पइष्येमन्नेनैव कालस्य सिद्धत्वात् ॥ ॥ अग्निहोत्रायणेनोनवैः सायंप्रातर
ग्निहोत्रहोमः। पूर्वस्याः कृत्तमग्निहोत्रमेव वानुरूपादिति। त्रिशातो वर्षेभ्यऊर्द्ध्वं दर्शपूर्णमासोत्सर्गे कृते आग्रयण
स्य प्रकारमाह। अग्निहोत्रायणिनः यस्याग्निहोत्रमेवायनं। नामानिकर्माणीति सोग्निहोत्रायणी। अग्निहोत्रमेवैतस्यैवका
रस्येतरथा ह्यसमर्थत्वात्। तस्याग्निहोत्रावृत्तिनो यजमानस्य नवैर्व्रीहियवान्नैः सायंप्रातरग्निहोत्रहोमो भवति। आ
ग्रयणकाले। केचिदन्यथेदं सूत्रं व्याचक्षते। अग्निहोत्रेणैवाग्निहोत्रहोमेनैवायनं आग्रयणप्राप्तिं आग्रयण
सिद्धिं यदिच्छति सोग्निहोत्रायणी तस्यैवं कर्त्तव्यं। अनुष्ठेद्दर्शपूर्णमासस्यापि एतदपि युक्तं। शाखान्तरे साभामे
नैवोक्तत्वात् ॥ ॥ ॥ तदाहितायावाग्रयणसा। नन्वेवमाहितानां तदाग्निमातस्यानवान्नखादिनामागोः पयसा वा सायंप्रात

रग्निहोत्रहोमः कर्त्तव्यः॥ ॥ईहिलिव्रतंच॥ संवत्सरदीक्षाहोमयज्ञप्रारब्धे आग्रयणकालातिक्रमशंकायां नवान्नेन दी-
३९ क्षितव्रतं कर्त्तव्यं। तेनैवाग्रयणस्य सिद्धिः। एतदप्याग्रयणकालस्यैव॥ ॥उपसत्सु रौहिणौ कुर्वीत। संवत्सरोपस-
त्कादेयज्ञे उपसत्सु आग्रयणकाले प्रवर्ग्ये नवान्नेन रौहिणौ पुरोडाशौ कर्त्तव्यौ। ताभ्यामेवाग्रयणसिद्धिः। एतदप्या-
ग्रयणकालस्यैव॥ ॥सुत्यासु सवनीयान् संवत्सरसुत्यासु आग्रयणकाले नवान्नेन सवनीयपुरोडाशान्कुर्वीत
॥ ॥सोम्यः श्यामाकचरुः शरद्यपस्य। आरब्धपक्षमस्याग्रयणं सोम्यः सोमदेवताकः श्यामाकचरुर्भवति। एतच्च वर्षा-
सु शरदि वा भवति आखंनरात्। श्यामाकाग्रपाकस्य तदानीमेव भावात्। तदाहापस्तंबः। वर्षासु श्यामाकैर्यजेतेति
मानवे विशेषः॥ शरदि सोमाय श्यामाकानामिति। शांखायनब्राह्मणोक्तवाक्यथात् आग्रयणस्याग्रहणोनात्रायका-
मो यजेत वर्षास्वागते श्यामाकस्तस्मै श्यामाकानुरूपेनैवश्चाहेति॥ ॥आपस्तंबसूत्रेन्वापंसमानतंत्र उक्तोस्ति। नानिष्ट्वा-
ग्रयणेनाहिताग्निर्नवस्याश्नीयाद्व्रीहीणां यवानां श्यामाकानामिति सग्रपाकस्य यजेत। माधवाचार्योप्येवमाह(?)-
माधवाचार्यस्तंत्रसंग्रहश्चासां निधेमोनिर्वपणकाले आग्नेयमष्टाकपालमिति विज्ञायते तेनानामिन्द्राराग्नं द्वादश-
कपालमाग्नेयं वा वैश्वदेवं पयसि चरुं सौम्यं श्यामाकचरुं द्यावापृथिव्यमेककपालं उक्तरत्ना द्यावापृथिव्यमेकेमत्- राम
माममंतीति। भिन्नतंत्रोपि विकल्पेन तेनैव उक्तः परिनात तंत्रो श्यामाकेष्टिं कुर्वीतेति॥ ॥वैराणवो ग्रीष्मे। ग्री- ३९

ष्मेत्यंतो वैणवो हृशापवमयः सौम्यश्चरुर्भवति। सौम्यश्चरुरित्यनुवर्त्तते। शांखायनब्राह्मणे तु विशेषः। अथ वसं
त आगते पक्वेषु वेणुयवेषु वेणुयवानुद्धृत्तेन वा आहेति प्रकृत्य तस्मा एतदेव पर्वैतत्तंत्रमेषा देवतैषा दक्षिणेत
ब्राह्मणं। तो हैव आग्नेयी वा वारुणी वा प्राजापत्या वा कुर्वेतत्तंत्रमेवैतद्ब्राह्मणमिति॥ आपस्तंबः॥ वेणुयवाना
मिष्टिमवेके समामनंति वेणुयवेषु पक्वेषु वेणुयवानुद्धृत्य वा इति संप्रेष्यति तस्मा एतदेव तंत्रमेषा देवताग्नेयी
मैत्रावरुणी प्राजापत्या वेति। एतत्तंत्रमेषा देवतेति श्यामाकेष्टौ पूर्वमुक्तं तस्मात्तिरस्कोयं॥ ॥श्यामाकवेणुवाग्रयणयोर्द
क्षिणामाह॥ ॥पुनःसंस्कृतो रथो दक्षिणा क्षौमं मधुपर्को वर्षांतवावासः। वाशब्दः प्रत्येकं योज्यः। यो रथो भग्नः स पुनः
सज्जीकृतः स पुनःसंस्कृतः। एवंविधो रथो दक्षिणा। अथवा क्षौमं दक्षिणा। क्षुमा अतसी तत्तंतुनिर्मितं क्षौमं। अथ
वा मधुपर्को दक्षिणा। मधुपर्कशब्देन दधिमधुघृतान्युच्यंते। अथवा वर्षोद्धृतं वासो दक्षिणा। वर्षासुत्तोप
घजमानेन परिहितं तद्वर्षोद्धृतं। शाखांतरे तु आग्रयणस्य पक्षांतराण्यपि संति। तथा च बह्वृचब्राह्मणे। पये
तस्येग्न्ना वामौस्यमासं वामावास्यं वा हविः कुर्वीत नवानामुभयस्याग्न्या अपि वा पौर्णमासे वामावास्ये वा हवींष्य
नुवर्तयेद्देवतानामपरिहाणायापि वा पयेवाग्न्वेव सायंप्रातरग्निहोत्रं जुहुयान्नवानामुभयस्यापि वा स्थाली
पाकमेव गार्हपत्ये श्रपयित्वा नवानामेताभ्य आग्रयणदेवताभ्य आहवनीये जुहुयात्स्विष्टकृच्चतुर्थीमोतुष्ये

२८ स्वाहापुष्ट्यैस्वाहेतिभवनानामपरिहारायापि वाग्निहोत्रीमिवनवान्नाद्पितानस्मैदुग्धेनसायंप्रातरग्निहोत्रंजुहुयादुभ
यस्यो ऽप्येन - नावंतःपातास्ति षांमेनकाममयेलतेनयजेतेति। तत्रैव। समानतंत्रावा दर्शापूर्णमासाभ्यां दृष्टीपसोमा
सोवा नवानामग्निहोत्रं वा यवाग्वासायंप्रातरग्निहोत्रीयान्नवानादपि लातस्ते दुग्धेनसायंप्रातरग्निहोत्रं जुहुयात्पाक्ता
हेय सेवास्थालीपाकं श्रपयित्वाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्य आहवनीये जुहुयादिति। आपस्तंबः। अपि वा
सोवास्यायां पौर्णमास्यां वाग्रयणेष्टिं मरुपातयेदपि वा॥ पौर्णमासीममावास्यां वा नवैर्यजेताऽपि वा अग्निहोत्री व्रीहि
स्तंबयवश्यामाकैर्वाग्रयणमपि लातस्याः पयसा सायंप्रातर्जुहुयादपि वा नवानां यवाग्वा सायंप्रातर्जुहुयादपि वा न
वानां स्थालीपाकं श्रपयित्वाहवनीये जुहुयात्तदाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्योऽपि वा नवानां चतुःशरावमोदनं पक्त्वा
चतुरो ब्राह्मणान्भोजयेदेवं पत्नेर्यजेत तत्राग्नेयपुरुषामाकोन भवत इति। तथा आग्रयणानंतरं दर्शपूर्णमासयोरीप्सनि
यमस्तु नैवोक्तः। व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेताऽयवेभ्यो दर्शपूर्णमासावेवं यवैरा व्रीहिभ्योऽपि वा व्रीहिभिरेवोभया
नैतेहवै सपयरतमाभवंतीति बह्वृचब्राह्मणं। वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिर्वसंते यवैरिति। कात्यायनमथाग्र
यणस्य बह्वृचब्राह्मणोऽभ्युपेते। यद्युनरुत्तमुपेक्षेत सर्वपहोनक्षत्रमुद्दिश्य यस्मिंश्चेद्वृत्तेकामयेत तत्तस्मिन्यजेतेति ॥६॥ राम
॥ अमावास्यायामग्न्याधेयं। अग्न्याधेयमिति वक्ष्यमाणाश्च कर्मणः संज्ञा सव्यवहाराय। कुरुक्षेत्रे पराह्णे स्छे २८

लेऽग्न्याधेयमित्यादेः। स्ताचाग्न्यगारकरणादीष्ट्यंतस्य कर्मसमुदायस्य संज्ञा। न मंथनमात्रस्य स्थापनमात्रस्य वा। तत्राग्न्या
धेयममावास्यायां भवति। अत्र चामावास्याशब्देन गौणपारुत्साम प्रतिपद्युक्ते कुतः। श्रुतौ तथा दर्शनात्। स यो मावास्याया
मग्नी आधत्त इति प्रकृत्य यदहरेवैष न पुरस्तान्न पश्चाद्ददृशे तदहरुपवसेत्तर्हि ह्येष इमं लोकमागच्छतीति मुख्यामावास्या
यामुपवासं दर्शयति। अत्रोपवासशब्देन यमनियमयुक्ताग्न्यस्थानमुच्यते। परेद्युरेवाग्न्याधेयस्याद्वैवाश्रीमान्। अथ जा
ग्रतिजागर्ति देवा इत्यादिकाऽतेनोपवसेत् यमनियमयुक्तो भवेदित्यर्थः। तस्मिन्मुख्यामावास्यायामग्न्यगारादिकृत्वा तस्मिन्नेवोप
क्रमप्रतिपद्याधानं कार्यं। न तत्राधानपक्षे तु पूर्वदिने उपक्रमः। नतूत्तरदिने मंथनं॥ ॥ज्योग्निीताधानस्यमानउपवसे सर्वा पौ
र्णमासी युक्तामामावास्यां न तत्र चेति शाखांतरं। आपस्तंबः। पौर्णमास्यां तु पूर्वे स्मिन्सर्वे तिथिमेधिष्यत्― ंभणीमयममप्रभूमयो
मतो पौर्णमासेन यजेतेति। काठके। आधानं चेत्पौर्णमास्यां पूर्वां तन्तूं देवताभ्य उपवहेदुत्तरामलारं भणीयामे पर्वणो चे
ति। अतश्च पौर्णमास्याधाने चतुर्दश्यामुपवासाद्युपक्रमः पौर्णमास्यामग्न्य―― ―रिष्टयश्च। ज्योत्स्ना रंभणीया पौर्णमासं चे
ति पूर्वेद्युरेवा ःपौर्णमास्यामलारंभणीयेति सिद्धं। कठसूत्रे। पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा
उत्तरेऽग्निहोत्रमुपतिष्ठमानो वसंतेऽन्वालारंभणीयां पौर्णमासं चेति॥ मानवे॥ पौर्णमास्यामाधयस्तो पवासप्रामारभ
णीयां कुर्वीत स यः कालयः पौर्णमास्यां यजेतामावास्यायामाधायन रूद्रेवा पौर्णमासीमुपोष्यारंणीयां कुर्वीतोऽत्र

३८ रामुपेष्य पौर्णमास्यायजेतेति॥ ॥ कृत्तिकारोहिणीमृगशिरः फल्गुनीषु। कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु च। एतेषु
नक्षत्रेष्वग्न्याधेयं भवति। अथ यममावास्यया सह विकल्पः॥ कृत्तिकास्वग्न्या आदधीत॥ रोहिण्यामग्नीनादधीतेत्येवमादि
भिर्वाक्यैः स्वतंत्रेष्वेव नक्षत्रेष्वाधानविधानात्। न त्वमावास्यायामेवैतेषु नक्षत्रेष्विति समुच्चय एवकृप्यं न भवति। नैवं उदि
तानुदितहोमवदमावास्याविनकृत्वाधाननिंद्यामावास्यासंस्तवास्य कृंतरताप्रतीतेः। तथाहि यद्यमावास्यायामग्नीनाध
त्ते यथाविहितायां द्वारि द्वारा पुरं प्रपद्येत स तत एव स्वर्गं लोकमियादेवं तर्हि अमावास्यायामाधानं विधायन कृत्वाधाननिं
द्यमाप्नोतीति। अथ यो नक्षत्र आधत्ते यथा पिहितायां द्वार्यपद्वारात् पुरं प्रपित्सेत् स जिह्मः पुरः स्यादेवं तर्हि तिप्रपित्सेत प
प्रवेष्टुमिच्छेत्। स पुरः पुरो भाग एव जिह्मः वक्रः प्रतिहतगतिर्भवतीत्यर्थः। तस्माद्विकल्प एव। न समुच्चयः॥ ॥ हस्तोला
भकामस्य। लाभकामस्य यजमानस्य हस्तेन सह हस्तो नक्षत्रमाधानकालः। यदिच्छेत्त्वमेदीयेतेति मक्षर्षाथेमशोहस्य
योगाल्लाभश्राहेनप्रतिग्रहेरा। यं प्राप्तिरूप्यते। तेनायं प्राप्नोत्यसेवकालः प्रतिग्रहस्य प्राप्नोत्यासेवोन्नतात्॥ ॥ चित्राक्ष
त्रियस्य। चकाराल्लाभकामस्य क्षत्रियस्य यजमानस्य चित्रा नक्षत्रमग्न्याधेयस्य कालो भवति॥ ॥ ज्योतिः श्रावणे। अग्नेः प
रिग्रहं कुर्यां द्विरात्रं वा कृत्तिकामृगे। रेवतीरोहिणीपुष्येज्येष्ठायामुत्तरात्रये। व्यवहारे सौरे। अग्न्याधानं द्विजेन्द्राणां स्यात्कृ। राम
त्तिकाविशाखयोः रेवतीरोहिणीपुष्यमृगसेहोत्तरात्रये। कारिकायां। माघादिषं च मासेषु श्रावणो वाश्विने तथा। कुर्यान्न ३९

गोत्रमांजेवाश्राषमनं शुक्लपक्षतः। हस्तद्वये विश्राखावाश्रुमृत्तिकास्त्रिमैत्याः। पुनर्वसुद्वये तद्वद्रेवतीषूत्तरासु च। सोमार्कि वाजि
तेवारे नाधिमासे न चापत्ये। चंद्रे ऽनुकूले स्वौ ह्युरिक्ताविष्टिविवर्जिते। इति॥॥ शाखांतरे ऽप्येष्वपि नक्षत्रेष्वाधानमुपते।
तद्यथा। आयत्नवः। हस्ते यः कामयेत प्रमेहीयतेति चित्रायां राजन्यो ध्यानत्व्य वो लिखारवायां प्रजाकामो। अनुराधेष्वृद्धिका
मः श्रवणे पुष्टिकामः उत्तरेषु प्रोष्ठपदेषु प्रतिष्ठाकामः सर्वाणि नि भवरेके समाप्तनंतीति। तथा अमावास्यां पौर्णमासीमा
स्यां वा आधेय इति॥॥ वसंतो ब्राह्मणस्य ब्रह्मवर्चसकामयोः। तस्माद्ब्राह्मणो वसंत आदधीतेति वचनाद्ब्राह्मणस्य निष्का
मस्यापि ब्राह्मणस्यैव वसंतः कालः। यतो ब्रह्मवर्चसं ब्राह्मणस्यैव युक्तं॥॥ ग्रीष्मः क्षत्रियस्य श्रीकामयोः। निष्कामस्य
क्षत्रियस्य श्रीकामस्य त्रैवर्णिकस्यापि ग्रीष्म ऋतुराधेयकालः। तस्मात्क्षत्रियो ग्रीष्म आदधीतेति वचनात्। अथ यः
कामयेत क्षत्रं श्रिया यशसा स्यामिति ग्रीष्मे स आदधीतेति वचनात्। तत्र श्रिये ति अत्र क्षत्रियजातिरपि श्रिया संपदा कीर्त्या च
ऋत्वात्मकः स्यामिति कामस्य मानस्य ब्राह्मणादेर्ग्रीष्म आधानकाल रस्वर्थः॥॥ वर्षाः प्रजापशुकामवैश्यरथकृणां प्र
जाकामस्य पशुकामस्य त्रैवर्णिकस्य वैश्यस्य निष्कामस्यापि रथकृतश्च वर्षा ऋतुराधेयस्य कालो भवति। तस्मा
द्वैश्यो वर्षास्वादधीतेति निष्कामस्यापि वैश्यस्य वर्षाः। अथ यः कामयेत बहुः प्रजया पशुभिः स्यामिति वर्षासु स
आदधीतेति निष्कामस्य त्रैवर्णिकस्यापि। वर्षासु रथकार आदधीतेति रथकारस्य निष्कामस्यापि। शाखांतरे शिशि

रः सर्ववर्णानामिति। तथा च शिशिरः सार्ववर्णिक इति च। शिशिरर्त्तौ सर्ववर्णानामग्न्याधेयं भवतीत्यर्थः। एवं कालमुक्त्वा
कर्त्तव्यमाह॥ ॥अग्न्यगारे कुर्वीत। अगारं गृहं। अग्न्योरगारे गृहे अग्न्यगारे गृहे अग्निगृहे अर्घ्योत्सप्रिमाणि। अग्न्यता
त्रिक्रमेण कुर्वत्स्य घर्योद्गमः। तत्र पूर्वं गार्हपत्यगृहं पश्चादाहवनीयगृहमित्यर्थः। अत एव कुर्वीतेति बहुवचना
स्येव चता। सौवेजः साधतीत्य पश्चात् पूर्वमेव बलोदयश्चता रक्षति जोवरणीयाः। अत एव तल्लिङ्गमात्राणि नैव कु
मौञ्ज—रेयेरिति सर्वसाधारण्येनोपरिहृता। तावैधवरणाभावेऽपि चंमेश्लाखेमेहोते सेवलौकिकं वरणामर्थाल
त्वेयां अमपथ्या विशिष्टप्रवृत्तस्य सिद्धेः॥ ॥उदग्द्वारं वा यदं। अथ गार्हपत्यागारमुदग्द्वारं तु पश्चाद्वा प्राग्द्वारं। आहव
नीयागारं तु प्राग्द्वारमेव कर्त्तव्यं॥ ॥दक्षिणापूर्वद्वारे। उभयत्र क्रमेण। अथ प्रस्य गार्हपत्यागारस्य दक्षिणो द्वारं कर्त्तव्यं।
आहवनीयागारस्य प्राग्द्वारं कर्त्तव्यं। न त्वेवमस्याग्न्यगारस्य पश्चिमे कं द्वारद्वयं किं न विधीयते। मैवं। गार्हपत्यागारे पूर्वद्वारद्व
यं किं न विधीयते। मैवं। गारे पूर्वद्वारस्याग्न्यादेर्वप्रामेर्विधमाननैर्हरणात्। अतो गार्हपत्यागारे दक्षिणद्वारं विहितं। पू
र्वद्वारं चाघोत। आहवनीयागारे पूर्वद्वारं विहितं। अपरद्वारं चाघोत। तस्मान्मध्ये गार्हपत्यादाहवनीयपर्यंतं धमनानि
नयनविधानं गार्हपत्याद्वेहरणं च संभवति। किंच। अस्या बह्वलामग्नौर्वेदक्षिणोद्वारे इति प्रसिद्धौ शोभोतेयं दक्षिणापूर्वेद्वारे इ
ति निर्दिशति। तदेवं ज्ञायते प्रतिमध्यमं गार्हपत्यागारं ततआहवनीयागारमिति। तथा च सति येषामपि बंधायेंऽग्न्याकर

समनारम्भापि दर्शिताश्च हेषु पूर्वे निर्दिष्टा इति ॥ ॥ पौर्णमासवद्वपनं । अत्र यजमानस्य पौर्णमासवत् केशश्मश्रुवपनं भव
ति । विकल्पस्य वपनस्य मासास्या बाधितत्वात् । श्रेणिपक्षातिदित्या इति केचित् । अपरे त्वेवमाहुः । पौर्णमासवद्वपनमित्यनेनै
व विकल्पे सिद्धे तत्तु न तत्र संभारसामवपने मन्त्र पुनर्वपनग्रहणादेवं ज्ञापयते पौर्णमासे नित्यमेव वपनं भवति न वि
कल्पे सिद्धे तत्तु न रूढं तत्र संभारसामवपने मन्त्र पुनर्वपनग्रहणादेवं ज्ञापयते पौर्णमासे नित्यमेव वपनं भवति न विक
ल्पेन । केशातु न तत्र संभारसामवपते मन्त्र पुनर्वपनग्रहणादेवं ज्ञापयते पौर्णमासे नित्यमेव वपनं भवति न विकल्पेन ।
केशश्मश्रुवपते वाशिखमित्यत्र वाशारस्याशिखवमित्यनेनैव संयोजनात् । शाखान्तरे नखनिकृन्तनमप्याम्नातमस्ति ।
केशश्मश्रुवपनेन नखानि निकृन्तते तेऽस्मासिवं पत्नी केशावर्जमिमा पत्तेवः ॥ ॥ सोमे वस्ते हते । यजमानो हते अधे
ते सकृत्य हृतालिते गाने सोमेव स्ते परिधत्ते । तुमाग्रतसीत ह्निकारे सोमे ॥ पत्नी च । पत्न्यपि अहत्ते सोमे वाससी वस्ते
परिधत्ते । सोमे वसाना वयी त्र्यारधीयानामिति वचनात् ॥ ॥ सर्वस्थिते धर्यवेदये । तेऽग्रहते सोमेन्याधाने संस्थिते स
माप्ति शते उपाभ्याम पि अध्यर्धवेदे पेरातच्छे । वरितार्थत्वा विशेषा स्मति यत्तिमायेत्नला विशेषा च ॥ ॥ गार्ह
पत्यागारे निर्मथ्याम्याद्धाति । अयोनिजमकाष्ठाभ्याम ग्निं निर्मथ्य गार्हपत्यागारे गार्हपत्यस्वरूपमध्ये नि
दधाति । अग्रे स्थानमुल्लिख्य सुपरेखा । गार्हपत्यस्थापनस्थापनस्थाने इति गम्यते ॥ ॥ वेरुपतुजांव

४१ शेषमहानसाद्वा। अग्निमाहृत्य गार्हपत्यागारे आदधाति इति विशेषः। वैश्यकुलाद्वाग्निमाहृत्य मंतत्रस्थापयति। वैश्यगृहाद्वा लौकि-
कोग्निर्हुतोस्य बोबाग्न्याद्यः। ननु तस्य परिगृहीतत्वाद्वसथ्यादि। अथवा अन्नं बहुपातत्वात्तत्वं दुष्टं हारिस्यर्थः। अथवा महा
नसात्। महानसशब्देन धान्यादिपाकार्थं गृहमुच्यते पचनागारं तत्र बहुपाकवशाद्रहती — तीर्भवति। स चाग्निः पंचभूसं
स्कारात्कृतो ह्यापनीयः॥ ॥ दिवा त्वाग्नीति राज्ञो वा। अथ यजमानो दिवैव अग्न्याति विषयोगतः। राज्ञो वा अग्न्याति अथवा
राज्ञो नाग्न्यातीति रात्र्यशानस्यैव विक्रमः। न दिवाशने सह। यद्यहरहस्त्वोग्न्याधेयस्यादिवेयाग्न्यादिरिति नियमेन दि
वाशनं विधायत रूपिकाममेव नक्तमग्न्यादिरिति रात्र्यशानस्यैव छंदयाविधानात्॥ ॥ उपास्तमयं देवाः पितर इति।
उपास्तमयं अस्तमयसमीपकाले आहवनीयागारस्य पुरस्तादुपविष्टो यजमानो देवाः पितर इतिमंत्रेणारेवाभि
रंभ्याह्वयति। तयोर्हे यं विद्वान्देवाः पितर इति ह्वयत्याहास्य देवा देवहूयं गच्छंत्यापितरः पितृहूयमिति श्रुतावस्य मंत्रस्याह्वा
नेविनियोगात्। पत्न्यपि तत्र दक्षिणतस्तिष्ठति॥ ॥ एवं वेशाय विशति। ततो यजमानः पूर्वेणाहवनीयागारद्वारेणाग्न्यगार
मोऽप्रविशति॥ ॥ दक्षिणेन पत्नी। गार्हपत्यागारस्य दक्षिणेन द्वारेण पत्नी अगारे प्रविशति। प्रवेशनविधेर्विहि
तद्वारपरत्वस्य युक्तत्वात्॥ ॥ पश्चादग्नेरुपविशतो दक्षिणतः पत्नी। उक्तप्रकारेण गार्हपत्यागारं प्रविश्य तौ पत्नीय
जमानौ स्थापितस्याग्नेः पश्चादुपविशतः। तयोर्मध्ये पत्नी दक्षिणत उपविशति। अथ यजमान उत्तरतः॥ ॥ अ राम
४१

श्वत्थ शमीगर्भोऽरणी प्रयच्छति। शमीमध्ये उत्पन्नोऽश्वत्थः शमीगर्भ इत्युच्यते। यो निरश्वत्थं तं प्राश्छाली शमीं तामिति
श्रुतेः। शम्यागर्भः। शमीगर्भः। अश्वत्थस्त्वासौ शमीगर्भः तन्निर्मिते द्वे अरणी अध्वर्युर्यजमानाय प्रयच्छति समर्पय
ति। तल्लक्षणं चैवं शमीगर्भस्याश्वत्थस्य प्राग्मुख्या उदग्मुख्या वा ऊर्ध्वगा या वा शाखायाः छेदं कृत्वा तन्मध्योऽरणी
कार्ये। ते च चतुर्विंशत्यंगुष्ठदीर्घे षडंगुष्ठविस्तारे चतुरंगुष्ठोच्छ्राये भवतः। मानं च मध्यमेनांगुष्ठपर्वणा कर्तव्यं। एवं वि
धा एका अधरारणिः द्वितीया उत्तरारणिरिति॥ ते चैते अरणी अग्निमंथनार्थं परिगृह्येते। ते एव सर्वदा धार्ये। अ
ते प्रतिपत्तिविधानात्। अरणी हृषमो इति। अत एव कात्यायनेनोक्तं। अरण्योऽस्मनध्यगं पावन्तिष्ठति पूर्वयोः। न
तावत्पुनराधानमस्यारण्योर्विधीयत इति। नाशारूपदाहादिनिमित्तेष्वरण्योः परिग्रहोपदेशात्। अरण्योर्दग्धयो
र्वा विनष्टयोः शीर्णयोस्तथा। आहृत्यासे समारोप्य पुनस्तत्रैव निर्मथेत्। इति। तथा च कात्यायनः। अरण्योः सुप
नाशाग्निगृहे यग्निं समाहितः। पालयेदुपशान्तेऽपि पुनराधानमिष्यते। इति एवं च निमित्ताभावे परिगृहीतयोर
रण्योर्नाशेच्छ पातावत्परिसमाप्तो पावकस्य मथनपि मंथनसंभवः॥॥ अभावे गर्भस्य। शमीगर्भोऽश्वत्थाभावेऽ
गर्भस्याप्यश्वत्थमात्रस्यारणी गृह्ये - तथा चोक्तं कात्यायनेन। अलाभे तु शमीगर्भोद्धरेदेवाविलंबित इति॥॥
तावेवं च द्वारण्यो उत्पत्तेरित्याहास्तमिते निशायां। अस्तमिते सूर्ये तदहानीमेव वनिशायां यजमानं प्रति अध्वर्युर्वीचं

यच्छापत्स्यौनु नेरितीमं प्रैषमाह । अस्तमिते आस्मिरात्रौ यजमानमाहेति शाखान्तरे श्रवणादेवमुक्तं ॥ ॥ पर्युक्ष्यं वा प्रधान
कालत्वात् । नाग्रावः पत्न्यपारत्नौ । उदयस्य समीपं पर्युक्ष्यं स्वामी येष्यपीन्नादः । सूर्योदयसमीपे वाग्रावेवश्रम्मक पत्रा
मनानंतरं वाचं यच्छेतीमं प्रैषं यजमानं पत्तिब्रूया त्रास्तमिते मात्रे । कुत एतत् । प्रधानकालत्वात् । वाग्यमो हि पत्नीयोगं । प
रार्थाश्च यत्प्रायानु पत्राम प्येसेवमादयोक्तहायांरात्रौ पर्युक्ष्यं विधीयते । अतो गानांम प्रधानकालता प्राप्ये निमा
माद्दमपमनस्यत र्थं प्रैषस्य च पर्युक्ष्यकालतेव घटते । एवं वाग्यमनस्य दृष्टार्थता भवति । यत वा तेन हि परार्थः सुविनकर्तु
ङ्कतेते । अन्यथा त्वदृष्टार्थता भवेत् । तस्मात्पर्युक्ष्यमेवेष वंधनारागा । यनु अ यते अस्तमिते आदित्ये रात्रावितितदुद
यसमीपे पिविमयमाशो । न विहन्यतेत रापि प्रागुक्ष्यान्त्रिवमवति ॥ कपिञ्जलरसंज्ञा रानंतरं या गच्छान पन प्रेषा
रिमं प्रैषमिच्छति ॥ ॥ ७ ॥ ॥ गार्हपत्यागारे जंबध्नाति न वा । अरत्निप्रदानानंतरं गार्हपत्यागारे स्वकीयं चरका मंचा
जं छागं बध्नाति । अपवान्व भ्रातीति विकल्पः । नद्वेके यूपधं नीति विधानं तदुत स्थान कुर्यादिति विहितप्रतिषि
द्धत्वाद्विकल्पः । एतोरा त्रिमजं बध्नातीति श्रवणा त्तमस्य समकालमेव बंधनीयः । रात्रिमिमसंत संयोग हिती याम्याः
श्रवणात् ॥ ॥ विधमानं प्रातरग्नीध्रे रघात । विधमानं यजमानस्य गृहे स्वत्वेन विद्यमानम जं अबंधनपक्षेपि संछि ते
कमेतापग्नीधेरघात । संछित इति वक्र एव पाठान् । कुतस्त्वेतत् । तदुत्तस्थानं तु कुर्यादिति बंधनपक्षेनिषिध्य यदघस्माज राम

स्याद्ग्नीध्रस्यैनमाननस्याचैवैनेवतं काममाप्नोति तस्माद्दुतं नाद्रियेते सजवं धनकामस्पदानेनैव संपद्यमानत्वेनहितु
भ्रतैनाज्जवे धननिराकरणात्। तस्मादेवं धनपत्नेगृहे विद्यमानस्यदानं। अत्र केचिदेवमाहुः यदि स्त्रीयोजो नास्ति नत्थैव
स्वैरकीयोप्यानीयवं धनीयः। यदिगृहे स्त्रीयोजो भवति तर्ह्येव बध्वैव यातरग्नी अन्यरेय इति। अपरे त्वेवमाचक्षते। स्व
कीयः परकीयो वापि कल्पेन संबंधं धनीयः। अत्र स्वकीयस्यवं धनपत्नेमानरग्नीधे दानं। नावं धनपत्ने तास्यवं धनपत्न
रति॥॥ अस्तमिते रोहिते चर्मण्यानडुहे चत्वारि हविष्यपात्राणि मिमीतेतं चातुष्प्राश्यं पचति। अस्तमिते सूर्ये रोहिते रक्तसमा
पादिते आनडुहे बलीवर्दसंबंधिनि चर्मणि उत्तरलोम्नि प्राग्ग्रीवे अधिकरणात्कृते चत्वारि हविष्यपात्राणि हविष्यस्य तंदुल
रूपस्य पात्राणि मिमीते। प्रक्षिपति। अत्र हविष्यशब्देन व्रीहितंदुला एवोच्यंते न व्रीहयो यवा वा। कंडनस्यानुक्तत्वात्।
अथ चातुष्प्राश्यमोदनं पचतीत्योदनश्रवणात्। तस्य न व्रीहिः तंदुलसिद्धान्ने रूढत्वात्। पात्राणि न्वमस्त्र तित्र प
परिमाणानि। तुदनस्य चतुर्भिः प्राशनीयत्वात्। प्राशनस्य चतस्रभर्थत्वात्तत्तेशप्रस्थतित्रयपरिमिततंदुलौदनेन सं
भाव्यमानत्वादिति॥॥ तं चातुष्प्राश्यं पचति। तं चतुर्भिः पात्रैश्चर्मणि मितं हविष्यं चातुष्प्राश्यं चतुर्भिः प्राशनार्हं त
स्मिज्जननस्य प्रथमोदनं तस्मिन्गार्हपत्यागारे स्थापितेग्नौ पचति। तमिति तमिति मात्रस्यैव निर्देशः संस्कारांतराशंकानि
रासार्थः। तेन नतिस्द्धाने व तंदुलान्प्रक्षाल्य स्थाल्यां पचेत॥॥ उद्वास्यैनमभिघार्य सर्पिरासिच्याग्न वच्छीति स्वः

४३ समिधो घृताक्ता आदधाति समिधाग्निमिति मन्त्रेण । तं श्रृतमोदनमुत्तरत उद्वास्य तस्योदनस्य मध्ये आसेचनं गर्तं कृत्वा तस्
मिन्नासेचने असंसृष्टं तमेव सर्पिर्घृतमासिंच्य आज्यस्थाल्याः स्रुवेण गृहीत्वा तिस्रः समिधो घृताक्ताः । तेन गर्त्तस्थितेनैवाज्ये
नाक्तास्तस्मिन्नेव स्थापितेऽग्नावादधाति समिधाग्निं दुवस्यतेत्यादिभिः मन्त्रैः ॥ ॥ उपत्वेन जपति । उपत्वेतीमं मन्त्रं
यजमानो जपति कुतः । उत्तरसूत्रे अर्धर्चग्रहणात् । त्रिभिरादधात्येकं जपतीति शाखांतरे श्रूयते । तेन क्रमेणाद्ये
स्त्रिभिर्मन्त्रैः समिदाधानं चतुर्थेन जपतीति ॥ ॥ द्वितीयं वार्धर्चं । अथवा यजमानो उपत्वेति जपति किंतु द्वितीयां पूर्वसमिद्दा
पतीमामन्त्रः । अर्धर्चं जपति ॥ स्वेच्छा नास्ति तामेव । एवं श्रूयते समिद्वतीभिर्घृतवतीभिर्ऋग्भिरग्न्यादधतीति समिद्
द्वतीभिर्घृतशब्दवतीभिश्चाधानं श्रूयते । द्वितीयायां च समिच्छब्दो नास्ति । तेन नास्याः समिदाधाने विनियोगः । अ
त्र विप्रतिपत्तिः । केचिदिदं ते द्वितीयां जपंति । केचित्स्वेच्छा नास्ति तामेवेति ॥ ॥ चत्वार ऋत्विजः प्राश्नंति । तमोदनं
चत्वार ऋत्विजो ब्रह्महोत्रध्वर्य्वग्नीध्राः प्राश्नंति ॥ ॥ एष ते ब्रह्मौदनरस्याह । ब्रह्मौदनप्राशनानंतरं राधस्ते ब्रह्मौ
दन इति एनमध्वर्युर्यजमानं प्रत्याह ॥ ॥ वरं ददाति । तत एव मुक्तो यजमानश्चोल्लिखितो वरं ददाति । वरशब्देन ये
म्योऽस्यपते । तदभिलक्षितं स्वाधीनं वस्तु यथाश्वपशुं हिरण्यादिकमुच्यते । तत्र चतुर्भ्योऽपि ददाति चतुर्भ्योऽप
स्थितत्वात् । अतएवाध्वर्योरिव दर्थान्तमब्रह्मणोपि ग्रहणमिति सिद्धं । प्रवृत्तप्रवर्त्तनेनार्थेसम्ब्रह्मन्वारब्धस्तनरहविः प्रथमा एम
४३

वः॥ ॥संवत्सरं वा पुरस्तात् कुर्यात् ततः सर्वानादधीत॥ ॥द्वंद्वं समस्तं स्थांतरं। अधानस्य पुरस्तात् संवत्सरं मानादिवरद्दामांतमोदृ
नंमस्सहं कुर्यात् ।ततः सर्वानादधीत॥ ॥द्वंद्वं समस्सत्तान्तरं। अधानस्य पुरस्तात् संवत्सरं मा नादिवरद्दामांतमोदनं मसहं
कुर्यात् ।ततः एवंविधात् संवत्सरं समिदाधानेन संस्कृतादग्नेः सकाशात् सर्वानग्नीन् गार्हपत्याहवनीयदक्षिणाग्नि
सभ्यानादधीत ।ते होतुः संवत्सरं चातुर्मास्यमोदनं पचमय तास्मै वाश्वत्थस्य तिस्रस्तिस्रः समिधो घृतेनाक्ता समिद्धतीभि
र्घृतवतीभिरग्निरभ्याधज्ञामस्य सम्मतोऽग्निर्जनित्वा स एव सम्भविते। तस्मात्तेः अस्मिंश्च पक्षे संवत्सरं समधमत्रिनेऽग्र ग्र
गारकरणाय पात्रमपजपांतं कर्त्तव्यं। ततः पूर्णे संवत्सरे उत्तरेहनिश्चत्वारः पर्यां भवंति। द्विवाग्रग्रानन्तनियमोज
वे धनजागरणा वाग्यं धश्चेति। एतेषामाधानानां सर्वाहोतारं व एव अवयानात् ।तथा हि। परद्वहरस्य श्वोऽग्न्याधेय स्यादि
वे वाग्नीयादित्सरोभनं नियमश्चाधानात् पूर्वेद्युरेव श्रूयते। तथा एतां रात्रिमजेवधूमती सजबंधनमपि तस्मान्ने
वरणेऽत्रो श्रूयते। अथ गायति जायपति देवा इति पक्षे समस्तं द्वंद्वतरः पात्रजरस्तपश्चिततरोऽग्नीध्राधनंत इति न्वतस्मापि वरणेऽत्रो
जागरणाश्रूयते। वाग्यमस्य वपदार्थांगत्वेन अधानकालत्वानुग्रहात्। अस्मिन्मते अग्निहोत्रकाले गार्हपत्यमग्नुपने
मनिमथ्य पृष्ठि नमाह॥ ॥गार्हपत्ये तु यतेयामामाग्निमाहृत्य चातुर्मास्यरूपपक्षे विहरेत्। होमकाले गार्हपत्ये उपशान्ते
ग्रामाग्निं लौकिकाग्निमाहृत्य तस्मिंश्चातुर्मास्यरूपमोदनं पचेत् चातुर्मास्यरूपमिति शरद् समर्थ्यान्ते नैव तु रोचाल

४४

णाग्नोजपिलाच तस्मात्स्त्रेः अग्निहोत्रहोमार्थं विहरेत्। चातुष्प्राश्यमित्यस्य गुणविधित्वेन नामधेयत्वासंभवात् चातुष्प्राश्य
धर्मातिदेशः। तेनमानादिवरणांतो लक्षधर्मोऽत्रन भवंति। अतोयथाश्रुतमेवपचनं प्राशनं च भवति। ग्रामाग्निमिश्रणेनैको
द्धरणाकालातिक्रमभयात् लौकिकस्याहरणं विधीयते। गच्छमानश्चेन्नजायेतेस्मादिकं तेन तद्देवहोमानंतरं स्वयोनेर
वगार्हपत्यस्याहरणं। स्वयोनिमतस्याभावाशादेपुनरपि संवत्सरं चातुष्प्राश्यपचनेन पुनराधानमिति॥ ॥ रात्रिंजागरणं
धारणे। सपत्नीकेन यजमानेन तस्यां रात्रौ जागरणाग्निधारणे कर्त्तव्ये। तत्र धारणोकरणानि पयमाह॥ ॥ शीकालेवा।
शकलैः काष्ठखंडैर्वा। सामर्थ्योझेमवपिंडेर्वास्थापितस्याग्नेर्धारणं कर्त्तव्यं। ननु वचनं विनाप्येवंमेवप्राप्नोति। सत्यं।
असमर्तरनियमार्थं पुनर्वचनमित्यदोषः॥ ॥ व्युष्टायामुपशामयेद्दक्षिणावास्हरेद्वाहार्यपचनं श्वेत। व्युष्टायां
रात्रौ संगार्हपत्यागारे स्थापितमग्निमुपशामयेत्यानुगमयिला वसंमालांतुपर्तते। अथ वा तमग्निं दक्षिणासंहरे
त्। न तु उत्साघ द्दक्षिणास्यां दिक्षपहरेत्स्थापयेत्। परं वेहुद्दिसोग्निः अन्वाहार्यपचनः कर्त्तुमिष्टो भवेत्। अस्मिम
न्हेद्दक्षिणाग्निमाहधतीत्यस्य सम्भित्कालेतमेवदक्षिणासंहृतमग्निमाहृत्य दक्षिणाग्निस्थाने भुवइतिस्थापयेत। लग्ण
हपत्याहाहृत्य॥ ॥ स्थानमुद्धिख्याभ्युसालारद्धेहिरण्यं निधायपोषारत्नकशान्तिवपसंतेषु ग्राकीर्णःततउपस्था
मितस्याग्नेः स्थानेमप्रहेरुांस्फोनो विश्वयजमानेनवाहेउद्केनाभ्युक्ष्य तत्र भूमो हिरण्यस्याक्लंनिधायतत्र

राम
४४

वोषानङ्गारखङ्करं च निवपति। ऊषशब्देन क्षारमृत्तिका अभिधीयंते। आखुकरशब्देन चाखुभिरुत्कीर्णाः पांसवोऽभिधीयंते। ऊषाखुकरसिकतापानंतरं तेभ्यः खङ्कारैररत्निमात्रस्ते च फलोष्ठमाकारः स्वरः कर्तव्यः। ततस्तस्य वृत्तस्य चरस्यां तेषु मांतेषु शार्कराः परितो निदधाति। ताश्च पंचावान्तरात्। पंचावाशा छर्करेत्येतनर्थं इति परिशिष्टोक्तेः॥ अत्र च पथममग्निस्थापनांगभूताः पंचभूसंस्काराः पूर्ववत्कर्तव्याः। तत उद्धिद्व्यासारद्वे यजमाने स्फ हस्ताग्र शार्कराणि धत्तातं कार्यं॥ ॥ हिरण्यमुपर्येव। एके उपरिष्टात्सर्वेषां संभाराणां हिरण्यनिधानमिच्छंति। एके पुरस्तादिति॥ ॥ एवमितरयोः। इतरयोराहवनीयदक्षिणाग्न्योरेवमेव स्थाने कर्तव्ये। तत्राहवनीयस्य स्थानमाह॥ पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु द्वादशसु सप्तसु वा। गार्हपत्यस्य खरस्य मध्यमस्थाद्यां रिश्यष्टासु पदिक्षेषु आहवनीयखरस्य मध्यं कुर्यात्। एकादशसु प्रक्रमेषु वा। द्वादशसु प्रक्रमेषु वा सप्तसु वा उक्तसंख्यातो प्रक्रमेष्वपि सप्तसु षडादिषु वा आहवनीयस्य खरं कुर्यात्। तथा अष्टासु विक्रमेष्वादधीत द्वादशस्वादधीतेति। तथा नात्र मात्रास्ति यावत्येव स्वयं मनसा मन्येत तद्वाराधीत स पञ्चाशत्प्पलस्कमिवमांव मुच्चरतीति श्रवणात्। अत्राहवनीयखरे पंचभूसंस्कारा न कृत्वा पुनरुल्लिख्याभ्यवारद्वे स्फरूपाणि शार्कराणि धनातं कुर्यात् अत्र जपाखुकरैः अरत्निमात्रश्चतुरश्रः खरः कार्यः। अत्र तेषु त्रिसप्ततिसंख्याः शार्कराणि धेयाः। पूर्ववद्घाविसप्ततिरिति वचनात्। खरप्रमाणं च यज्ञपार्श्वे उक्तं। अरत्निश्च

तुरश्रस्य पूर्वस्माग्नेः खरो भवेत्। एवं चक्राकृतिः पश्चाच्चतुःशार्द्धे खरदक्षिणा इतिनिगमेच। परिमंडलं गार्हपत्यस्याधिष्ठम
४५ रत्निमात्रं चतुरश्रमामाहवनीयस्यार्द्धं चंद्रवद् दक्षिणाग्नेः सभ्यावसथ्ययोर्गार्हपत्यस्य च इति॥ ॥इतरस्य वितस्तीमे दक्षि
णातः। इतरस्य दक्षिणाग्नेर् दक्षिणतो वितस्तीमे स्थानं। तस्य साधनोपायः शुल्बकारेणोक्तः। गार्हपत्याहवनीययोरंतरषसम
मधा वा गंतुं समं त्रेधा विभज्यापरवितस्ती प्रलम्बहतेन दक्षिणापश्यत क्षिन्नग्नि विलेकः प्रकारः। अपि वांतरत्रिभागो न्यस्या
म रद्धा खल्वर्द्धं स चतुरश्रं कृत्वास्य। एषा मान्नि रिति द्वितीयः प्रकारः। एवमन्यतरेणोपायेन स्थानं कृत्वा ततः षोडशांगुल
ता तीयेन त्वं स्यात्षोडशांगुले। लावदेवन्तरोमात्वाहरेहृत्तेमध्यपूर्वके इत्यनेनोपायेनारत्निहैः उपकल्प मर्द्धं चंद्राकारं
दक्षिणाग्नेः खरं कुर्यात्। अत्राप्युपकल्पनादिशोके रत्नि धन्मांते पूर्ववत् ऊषा खल्कारे अर्द्धचंद्राकारः खरः कार्यः। त
तः प्रातिष्ठद्वाविंशतिः शंगा विधेयाः सभ्यावसथ्ययोर्गार्हपत्यस्य च साधनमिति पारित्रिकोणे गार्हपत्यस्य खरं वसप्य
स्यापि ततः खरुपले प्रमाहिपंचाशच्छ केरात्नि धन्मांते संस्कारैः कर्तव्यः॥ ॥उद्धननमग्निमंथनं। अग्निमंथनमग्ने
र्गार्हपत्यस्य मथनमुद्धृत्य इति तेस्मर्पयेत् कृत्तं यः। एष वा विद्वांसु दिते मंथतीति श्रुतेः॥ ॥अनुदूर्य एके। एके अनुदूते
अनुदिते एवं सूर्ये मंथनं कर्तव्यं मिमाहुः। तदेवं अनुदिते मंथिह तिश्रुतेः॥ ॥उदिते नहुरणां। उद्धरणं कर्म्यपहृत्युरि। एम
त एव सूर्ये कर्तव्यं। तमुदिते मंथ चमुद्धरंतीति श्रुतेः। अतश्च मंथनमनुदिते उदिते वा। उद्धरणं तू दिते एव सिद्धं॥ ॥ ४५

अपरेणागार्हपत्यायतनेमंथनंभवतीतिसूत्रशेषः॥ गार्हपत्यायतनंअपरेणागार्हपत्यस्यपश्चात्प्रदेशेत्रोअग्न्याहरेग्निमंथनंकु
र्यं॥ ॥अश्वमानयेतिब्रूयात॥ अश्वमानयेतीमंमेषमेधंपुरस्तीधमतिब्रूयात॥ ॥छिंनअश्वेपुरस्तात्ताअश्वेपुरस्तात्अ
अग्निस्थितेमंथनंकुर्यात। तत्रयपधममअधरारणिमुत्तराग्रांनिधायउत्तरारण्यापोईशानदिग्भागाद्दशांगुलदीर्घंद्व्यंगुल
विपुलंप्रमंथंछित्वातस्यमूलंचत्रबुध्नेप्रवेश्यअधरारण्यामूलादष्टांगुलंत्यक्त्वाअग्राद्व्यंगुलंत्यक्त्वातत्स्थानेअंगु
लचतुरश्रपरिमितेपूर्वेदेशेपंतेमंथनस्थानंकृत्वाचत्रबुध्नप्रोतस्यप्रमंथस्याग्रंतत्रनिधायचत्राग्रकीलकाग्रस्योप
र्युदगग्रामोवीलींनिधायपंचत्रंधारयित्वाचत्रंनेत्रेणामर्दक्षिणोत्तरवेष्टयित्वातयामंथनंकुर्यात्यथाजातोग्निःस्यात्पत
ति। तत्रयजमानःशाखसुखोपंत्रधारणंकरोति। पत्नीचत्रंनेत्रेणात्रिर्वेष्टयित्वामंथनंकरोति। ततःशाखांतरार्द्धंसुश्र।
तस्मादर्धसुःप्रमंथस्कुखोभिमंथतीति। चत्रंचखादिरंद्वादशांगुलदीर्घंकर्तुलंत्रअग्रेलोहकीलकंसुकंबुध्नेप्रमंथाग्रप
वेशार्थंगर्तंयुक्तंमूलेअग्रेचलोहपरिकासंयुक्तंपकार्यं। वीलीचखादिरीद्वादशांगुलदीर्घांमध्येअंगुलविपुलाअ
धोभागेप्रमाचत्रापस्थितकीलकोपरिस्थापनार्थंलोहपरिकायुक्ताउपरिभागेवर्तुलाचकार्या। नेत्रंचगोवालकृतशणसू
त्रेत्रिवृच्चाममात्रंकार्यंकिंचिन्मंथाग्रेणामंथेति। अपरेतुमूलेन। तत्रमंथनमूलेनमंथनंकार्यमपनेनोक्तं
रुत्सकारिकायावातपद्या। चत्रबुध्नेप्रमंथाग्रंदत्त्वाविविद्यतः। कुलोत्तरायामरणीतद्धुधमुपरिमक्षतिरिति॥॥॥

४६ जातेवरदानं।जातेग्रावधर्मविवरदानं यजमानः करोतीति वाक्यशेषेणाध्वर्योरभिलषितं यजमानस्वाधीनं किंच न हिरण्या
दि द्रव्यमुच्यते॥ ॥मनसैके।एके इच्छंति अहमिदं वसु अध्वर्यवे दास्यामीति मनसा संकल्प्य पश्चात्संमतमात्मसन्नंतरं द
दाति।नदानी॥ ॥तस्याभिप्राणस्याप्राणान्मंतरेद्धारयति।तस्य जातस्याग्रे यजमाने नाभिप्राणः कार्यः।प्राणापमृतेऽधर
ति मंत्रेण।अभिप्राणस्य प्राणानिति मिलनहीकृत्य मुखेन श्वासस्य समर्पणं।फूत्कारकरणमित्यर्थः॥ ॥उच्छ्वासोमंत्रार्था
आरभध्व इति।उच्छ्वासो वह्निज्वालापानन्नुद्धे श्वासेन मुखमध्ये ग्रहणं अमृतमायाआरभध्व इति मंत्रेण यजमानेनै
व कर्तव्यं।सउनरपानितीति वचनात।तदेतमेतदात्मन्नाधत्त इति श्रुतेः।श्वासमंत्कारकमुच्छ्वासस्य प्रतीयते।
तेनास्य यजमानकर्तृत्वं कथं।तथैवैनं पश्चेऽभिमश्येति तज्जातमभिप्राणितिस पुनरणनितीत्यत्र यद्युनरि सजनन त
च्छद्दे नाभिश्वासकर्तुर्देवो यान्तक्रियाविधीयते।अपानानन्तक्रियायाश्च यजमानकर्तृत्वं कस्मात्प्राणनमपि यज
नानस्ये विकल्पमयं यजमानकर्तृत्वं सिद्धं।तज्जातमभिप्राणितीत्यभिप्राणस्यसंजातसंयोगात्ततः सर्वोऽधीते
सस्मिमहत्तेनभवति।उच्छ्वासस्तुभवत्स्येवात्मसंस्कारणं॥ ॥ला॥ ॥दाहसिर्हूलंतमारधाति भूर्भुव इति सं भ
रैध मुधाल्यायनपतेव्रते नारदथ इतिपयविं।तं जातमभिदाहह भियेतिपदहत्तकाहेतेलं मां इहीव्यमानस एम
भारेषु संभारणो हिरण्यपाणिनामुपरिस्थापयति।भूर्भुव इति संत्रेण।अन्नपत्यान्नपत इति मंत्रेणावा।पयवीतिपरस्मप ४६

स्य पत्न्या अषिर्भवति तस्मा अमुष्येति स्थाने तद्दृषिवाचि पदं षष्ठ्यंतं प्रयोज्यं । तथा । अंगिरसां त्वा देवानामिति अंगिरसां । भृगूणां त्वा देवानामिति भार्गवस्य । भार्गवांगिरसव्यतिरिक्तानां सर्वेषामादित्यानां त्वा देवतानामिति सेव । एवं हि ज्ञात्वीतरे पघते । तथा चापस्तंबः ॥ ॥ भृगूणां त्वा देवानां व्रतपते व्रतेनादधामीति यो भार्गवस्स्यादंगिरसां त्वा देवानां व्रतपते व्रतेनादधामीति यो वाऽन्य आंगिरसः स्यादादित्यानां त्वा देवानां व्रतपते व्रतेनादधामीति समासां प्रजानां । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामीति राज इंद्रस्य त्वेंद्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य मनोस्त्वा ग्रामण्यो व्रतपते व्रतेनादधामीति वैश्यो नामादित्यानां त्वेति रथकारस्येति मघव्यां धमनानीति ॥ ॥ वरुणस्य त्वेति क्षत्रियस्य । क्षत्रियजाति यजमानस्य अमुष्य त्वेतस्य स्थाने वरुणस्य त्वा राज्ञो व्रतपत इति मंत्रेणादधाति ॥ ॥ इंद्रस्य त्वेति राजन्यस्य । एजमस्याभिषिक्तराज्ञोपत्यस्य यजमानस्यामुष्येति स्थाने इंद्रस्य त्वेंद्रियेण व्रतपत इति मंत्रेणाग्निमादधाति ॥ ॥ मनोष्ट्वा ग्रामण्य इति वैश्यस्य । वैश्यस्य यजमानस्यामुष्येति स्थाने मनोष्ट्वा ग्रामण्यो व्रतपत इत्यग्निमादधाति ॥ ॥ ऋभूणां त्वेति रथकृतः । मांहिष्येण करण्यां जातो रथकृत् । इति केचित् । तन्मुसौधलनसालतोय रथकर्मोपास्त्वेव स्त्रिकेभ्यो हीनो निषतः कुष्ठिन्नातिविशेष इति पार्थसारथिमिश्राः । तस्य रथकृतो यजमानस्य अमुष्येति स्थाने ऋभूणां देवानामिति मंत्रेणाग्निमादधाति ॥ ॥ रथंतरं गायेति । प्रेष्यति । ततो रथंतरं गायेति । प्रेष्यति ॥ प्रेषप्रेषा

४१ र्थयोः कर्तव्यमेदाज्जन्ताप्यते कः प्रैषोक्तो वायमेषार्थ इत्यत आह ॥।। गानमध्वर्योः । अत्राध्ययने साम गानमध्वर्योः स्यात् । कुतः । समा

ख्यानात् । यतो धनुर्वेदः साम गानं विहितं । सामवेदे तु उभयत्रिमात्रं ॥ प्रेषार्थं समधानमतेला ह्येवमानेत्याह । ब्रह्मा वा

वेदप्रयोगात् । वाशब्दः एवौ रूपस्तनिरासार्थः । ब्रा लिवात्र सामा निगायमतिनाध्वर्युः । कुतः वेदप्रयोगात् । वेदे नप्रयोगो वेद

प्रयोगः । ब्रह्मणो हि सामवेदे नप्रयोगोस्ति ग्रहणाधारणारूपेणामेन त्रिवेदस्यैव ब्रह्मत्वे अधिकारः । अतः स एव सामगा

नेधिक्रियते ॥।। स्तुत्वा ब्राध्वर्योः । अध्वर्योः पदार्थान्तरेषु स्तुत्वा ब्रह्मैव गायति । अत एव छत्रांतरं प्रस्तोतापी

समानिगायति । अग्न्याधेये सौत्रामण्यां च ब्रह्मेति ॥।। दण्डेनो दशानुपयम्य । अष्टादशोऽधं परिधिहस्तार्णामितु

त्वा दपरिमितं प्रणायनीयं त्रिपुनमितुं त्वा उपालाशादैकं कृतादिधिपरिधिहस्तं वंधिसमविंशतिका

हमस्य सपरिमितया एकेन त्रिपुनबद्धेने धनेन गार्हपत्ये अग्नीनाहवनीय स्थोऽङ्गरणी कर्त्तव्यं । किं कृत्वा । उपयम्य ।

उपयमनीभिर्मृत्तिकाभिः बर्हिमात्रसंख्याभिः प्रदीप्तस्य धनस्याधस्तादुपद्घ्यवगृह्य होत्वा । तस्मिन् ध्नन्ति धानंकृति

कामहितेकपरेनिधाय मे स्यार्थः । अग्नेर्द्धानहवींषि स्रग्रहणाविधानाद्रुनमुत्साद्य पनं काय्यं ॥।। पयेनं धनमड

वेषात्तातेथा दधेनेष्ठा हांकलं यपथा धनमूर्त्तं यजमानमुपेयात् । उपगच्छेत । अनेन प्रकारेण यजमानो धनम

मनुगच्छेदिति विधीयते । अथवा अयमर्थः । यजनादिना तथा पत्रः कर्त्तव्या दण्डा धनमो यजमानं प्रतिगच्छती एम

४१

नितं वैतन्येव हार्दस्तुपर्येनमेषमस्तु॰ पाचोरेदेषवैमन्नोपरग्निः प्रत्यह्वैवैनं यन्तः प्रविशतीति। एतं यजमानं स्वोग्निः
प्रत्यङ्क्रती यउयगच्छेत। यां दिशं धूमो यादिति तस्यां दिशि स्थितो यजमानोग्निनासहाहवनीयं परेशां गच्छेदित्यर्थः॥ ॥वामदे
व्यमिति प्रेष्यति। यदो मपि धर्मदुघस्य वामदेव्यं गायेति ब्रह्मा साम धर्मदुघः प्रेष्यति॥॥ अग्न्युपरता युमतरभावेऽनुवाच्या
भावेन ज्ञान। उद्धरणे क्रियमाणोऽग्निः अग्नेः पुरस्तादयनोपैति। तं यत्र यो वहरंतितत्पुरस्तादस्य नयंतीति श्रुतत्वात्। कीदृ
शोऽग्निः। पुत्रा। तद्गणाः। सर्वे पूर्वे वा–स्यादिति श्रुतेः। तस्य एनोऽग्नेरभावेऽन्य पुत्रा। अन्तरगतोऽपि। यदि सर्वे वाहनविंदहवि
यस्कन्दस्याग्नेः स्यादिति श्रुते यघ्योनसंयघते तस्मिन्नज्ञाज्वलीवर्द्धिष्यत्नो नीयते। यद्यग्निं न विंदेत् मथनङ्गानेवस्या
दिति श्रुतेः। मंथनकाले य आहूतोऽग्निः स एवाग्राह्यः प्रकृतत्वात्। तेन मंथनकाल एवैतस्य तत्र यं। तद्यथानुद्गसतेऽग्न
ग्निमानयेति प्रैषाभावः अनभिधानात्। नवोहः प्रकृतित्वादिति॥ ॥समारूढेन धिष्ण्यायद्दक्षिणा पूर्वं पादेन मांचंतीता
व संस्थापयपति। एवं प्रस्तुतिश्चे अग्रतो नीयमाने आहवनीयखरसमीपं प्राप्य प्रस्तुरवसे वाग्नेय्यद्दक्षिणापूर्वपादे
नाग्निम दक्षिणाचरणोताहवनीयखरस्थानं हिरण्यादिसंभारान धिष्ण्यापाग्नेयपादेनोक्रमय्यतमन्वंयां व नीताततस्त्री
वत्सं प्रदद्। दक्षिणावर्त्तेतेनयंत्र स्थुरस्वं स्तत्र संमुखं स्थापयपति। अथाग्निमाक्रमयतितमाक्रमय्यप्रां चमुत्तरपतितंउ
नरावर्त्तयतीति श्रुतेः। अत्र हि उत्तरतोऽग्नेः संनीयमानत्वा दक्षिणेन पादेनाक्रमणमुक्तं। अतएवोक्वासं भरणेऽग्न

४८ ध्वस्य दक्षिणो नीयमानत्वादग्निमः सभ्यपार्श्वे संनिहित इति सभ्येनैव पिंडस्थाने मार्गो कर्तव्यः॥ ॥ इहहरिति प्रेष्यति। अग्रश्वेतस्य
भुवमवस्थाप्याधर्तुर्वेहजामेति ब्रह्मणा प्रेष्यति॥ ॥ अग्निना परं द्विरुपस्तरणमुपस्तीर्य नारधाति येनं प्रथमेन वा भूर्भु
वः स्वरिति पूर्ववत्। इध्मस्त्रिनाग्निना स्वरमध्ये संभारस्योपरि हुतमध्वस्य परं पदमुद्दा द्विरुपस्तरण द्विर्वा। स एव हुता
तीयेनोपस्तरणेन सह हुतमग्निं तत्राध्वपरे आरधाति स्थापयतिम भूर्भुवः स्वरिति मंत्रेण पूर्ववत्। तानमध्वस्य परं आध
त्त इति प्रक्रमस्य सवेदस्त्रीमेवाग्र उपस्तरणस्य यथोपच्छत्सयोपस्तरणाति भूर्भुवः स्वरिति चतृतीयेनारधातीति श्रुतेः।
अथ वाग्निनापदे सहरुपस्तरण द्वितीयेनोपस्तरणेन सहाग्निमारधाति। अथवेदं द्वितीयेनहस्तीमेवाग्र उपस्तरणम
थो पच्छति भूर्भुवः स्वरित्येव द्वितीयेनारधातीति श्रुतेः। अथवा प्रथमेनैवोपस्तरणेन सहाग्निमारधाति। प्रथमे
नैवोपस्तारधातीति श्रुतेः। एवं वरिसमुष्यत्वा व्रतपत इति यथेति वलम्यते॥ ॥ पुरस्तात्परिक्रम्य धमपूर्वोर्द्धं ग
हीत्वा घोरिवमन्त्रेणाह। ततः स्थापनानंतरं यजमानोग्रे: पुरस्तात्परिक्रम्येध्मस्य पूर्वार्द्धं गृहीत्वा इध्मस्याग्रभागं
हस्तेनालभ्य हाय घोरिवमन्त्रेस धुमंत्रमाह। जपति। अथ पुरस्तात्परीत्य पूर्वार्द्धमुल्मुकानामभिपद्य जपतीत्यो
र्थे मारिश्रुतेः। इध्मपूर्वार्द्धेग्रारंभणं इस्मात्वा रंभस्योक्त्वा द्रव्यारंभस्य च यजमानत्वात्तत्रापि यजमानस्य कर्तृ एम
त्वं मंत्रलिंगाच्च। अग्रिमत्वादमन्त्राघायाहध्यदिति॥ ॥ आपयोरिति वोपतिष्ठते सा पर्यन्तानि। वदशाह्याघजमान ४९

इत्वायं गौः पृश्निरित्याद्याभिस्तिसृभिः सार्पराज्ञीतिः सार्पराज्ञ्या दृष्टाभिर्ऋग्भिराहवनीयमुपतिष्ठते। सार्पराज्ञीसा
मश्च संज्ञासंव्यवहारार्था। सार्पराज्ञीर्नेवा कुर्यादित्युपरान्तु सार्पराज्ञीविमाहते।।।।। दक्षिणाग्निमादधाति।। गा
र्हपत्यादग्नेरेकदेशमादाय पराहृत्य भिन्नं तं दक्षिणाग्निस्थाने स्थापयति। अत्र शाखान्तरमनुवः अनुष्यलेति व
भवति। तथा चापस्तम्बः।। लौकिकमग्निमाहृत्य मथित्वा वा द्वितीयपक्षमाहृत्या दक्षिणाग्निमादधाती सिंयदिवं
गार्हपत्यागारे पूर्वदिने स्थापितोग्निर्दक्षिणासंहृतो भवति। अत्राहार्यपचनोपकरिष्यत इति बुध्या तदानीत
मेवाग्नीयाधुना भुवइत्यादिना दक्षिणाग्निस्ववरे स्थापयति। तदुक्तं। दक्षिणावासंहरेदन्वाहार्यपचनमित्यादि
ति। अस्मिन्पक्षे यावज्जीवं स एव नित्यो दक्षिणाग्निः सर्वदा धार्यते। अनुगतश्चानाहिते एवं स्वयोनेरन्धिपतेवे
तान सूत्रे पठ्यते। दक्षिणाग्निर्निर्मथ्य आहार्यो वा सभ्यावसथ्ययोराहवनीयाद्विहारः सभ्यावसथ्ययोरिति।। सभ्यं व
निर्मथ्य। ततो गार्हपत्यस्य वदेवसभ्यसंज्ञमग्निं निर्मथ्य चकारादाहृत्य दधाति सभायां स्थापयति। सभायां भवः सभ्यः
त्यर्थोनुगमात्। अथ पएष सन्नाप्यामग्निरिति वचनात्। आहवनीयोपि पत्नी पविरूपशिष्यास्मादयति। आवसथ्य
तमेत्यजते। सभ्यस्थापनं गार्हपत्यवद्भूर्भुवः स्वरसमुप्पलेति मन्त्रेण च भवति। सभ्यावसथ्ययोर्गार्हपत्यवदाध्मा
नमिति परिशिष्टे।।।।। गां दीव्यधंमित्याह। सभ्यस्थापनान्तरं यजमानस्त्विजः प्रतिगां दीव्यध्वमिति ब्रू

वमाह । हरिवुद्धौ उशना । तेनहेन्त्विजः पूर्वंगां परिशं कृत्वा शीघ्रमधाद्यूतं कुरुहधमिति । मैषार्थः । शीघ्रमद्धमितिवद्भूवचना
त्तेषामेव प्रस्तुतत्वाद्वृत्तत्विजो घृतसंवत्सरेण भवंतीति मतीयते । न यजमानः । अत एव तस्य प्रेषणो कर्तव्यं । उद्देघ
ते संपामे गंमहमस्यसम्प्रज्ञावान् । धारणोपस्थानमत इत्यग्रे विसर्गांगस्मैवोपदेशात् । अतः पुनरप्रेषेण भवतीत
त्रसमस्य धारणोपस्थानं यावज्जीवं कर्तव्यं । अतरस्तु क्वचान्नर्हविषां संवत्सरपरमासादिकालांतरेऽनुष्ठाने
विसमस्य धारणमननिशिसाभांतमुहूर्ते समभासनमस्येत्येतदुपस्थानं चोत्तरवारस्य यावज्जीवं कर्तव्यमिति निश्रीय
ते ॥८॥ ॥ उपेतवारवंतीयमज्ञापज्ञीमानीति च प्रेष्यति । कृद्वाणस्य प्राधानानंतरं । उपेत वाग्वंतीयप्रज्ञापतिपानिगाये
ति ब्रह्मा सामधध्वर्युः प्रेष्यति । एवमेकवारमेव त्रयाणामेष इति केचित् । अपरे तु उपेतं गाय्य वाग्वंतीयं गाय प्रजापति
यं गायेति क्रमेण तत्तत्कालानंतरं प्रेषत्रयमाहुः । तथा सति प्रैषप्रैषार्थयोरानंतर्यमनुगृहीतं भवति ॥ ॥ इतिहो
मात्रीमती सोररुत्सृजति । अध्वर्युः प्रस्त्तिणांसर्वांतग्नीमती स्रपरिगत्याध्वर्युरुदीच्यांदिशि स्फ्यमुत्सृजति । तमुदंचं
प्रमुंचतीति वचनात् । इति होत्रेति ग्रहणं चेतरथाहजिः ॥ ॥ स्तुतस्तवस्त भाष्टेमामवपनवीजुष्टाश्रमाणानां
अपूर्वत्वात् । भणामार्थपंशज्जीर्नवा कुर्यात् । यतानिरू पुनस्तत्राहीनि अश्रया येपत्कुर्यात न कुर्यादिति विकल्पः । सर्वे
षां विहितप्रतिषिद्धत्वात् । तथाहि ज्ञातात्तावदुच्यते । तस्माद्ब्राह्मणोऽवपन्तश्चार्द्धीतमेवमादिना वपनस्थतास्त्रिपाधानं

विध्यापतेर्वाश्तन्नतत्वउभयपश्वापहतपाप्मानइंद्रस्यकाज्ञलबनाशंकरोति।तस्माद्यद्वैवैनंकदाचपत्नउपनमेद्यायाग्नी
श्चादधीतनश्वःश्वमुपासीतकोहिमनुष्यस्यश्वोवेदेति।तस्माद्यस्मिंश्चकस्मिंश्चिदृतौसोमयागएनंयजमानंउपन
मेदभिगछेद्दर्शानंतरमेवाग्न्याधानंकुर्यात।श्वःश्वःकरवाणीत्येवंकालोनश्यतीत्यानवकापतिच्च हेतुः।कोहीतिम
नुष्यस्यश्वःकालसंबंधिजीवनंकोवेदकोनामजानीयाद्वपुषोस्थिरत्वादितिस्कमर्थः।तस्माच्छ्रावणांतरं।यदहरेवैनं
श्रद्धोपनमेत्तदहरादधीतेतिसोमेष्ट्याविनापिकेवलस्यैवाधानस्यज्ञलनाहरः।तथा।नक्षत्रेष्वपि।कृत्तिकास्वग्नीमा
दधीतेत्यादिभिर्निर्दिष्टेष्वाधानंविधायतस्मान्नकृत्तिकास्वादधीतवैतानसत्रेवापर्वैवकदाचिदाद्धयमश्रद्धात्वेवे
नंजातीयादिति।तथा।तस्मान्नमृगशीर्षेआदधीतनस्मान्नेनहस्तेआदधीततस्मात्पुनर्वसुर्यन्तत्तन्नक्षत्रस्वस्मादेषयहे
षांवीर्यंक्षत्रमादत्तपयधानहस्तवकामःस्यादितिहस्तेनपातकंनक्षत्रेपक्षपर्यःसएतेनैवपुराएषाहनयद्धतेषांनक्षत्रा
णांकामयेततत्तदुपर्येत्तस्मादुक्तपर्यन्तनक्षत्रेस्वस्मादितिनक्षत्राद्रेणपुराएषाहसर्पेनक्षत्रेस्वाध्यानस्मात्कृत्ता
त।नवनक्षत्रानादरः।मावामस्मायामेवमविष्यतीतिश्रद्धोकनीपं।सएतेनैवपुराएषाहिनेसनेनपुराएषाहमात्रेविज्ञानात।
संभारेष्वपि।पंचसंभाराःसंभरतीतिविधायप्रतिषेधतिनैवैकंचनसंभारसंभरेदिति।अतोविधाय्यप्रतिषेधा
